M-121

तमिति अश्लीलं पर्षदयोग्यं वचः परिवादः सदसद्रूपपरदोषप्रकाशनम् आदिशब्दाद्गंधमाल्यादिनिषेधः मनुः वर्जयेन्म
धुमांसं च गंधं माल्यं रसान्स्त्रियः शुक्तानि चैव सर्वाणि प्राणिनां चैव हिंसनम् अभ्यंगमंजनं चाक्ष्णोरुपानच्छत्रधारणं कामं क्रो
धं च लोभं च नर्तनं गीतवादनम् द्यूतं च जनवादं च परिवादं तथानृतं स्त्रीणां च प्रेक्षणालापमुपघातं परस्य च एकः शयीत
सर्वत्र न रेतः स्कन्दयेत्क्वचित् कामाद्धि स्कन्दयेन्नेतो हिनस्ति व्रतमात्मनः व्रतं ब्रह्मचर्यं स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमका
मतः स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं पठेत् पुनर्म्मीतस्मादेनसो विमुच्यत्वंहसः यदिवा यदि नक्तमेनांसि चकृमाव
येति इंद्रियाणां विचरतां विषयेष्वपहारिषु संयमे यत्नमातिष्ठेद्विद्वान्यंतेव वाजिनाम् बुद्धीन्द्रियाणि पंचैषां श्रोत्रादीन्य
नुपूर्वशः कर्मेंद्रियाणि पंचैव पाय्वादीनि प्रचक्षते एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकं यस्मिन्जिते जितावेतौ भवतः पं
चकौ गणौ इंद्रियाणां प्रसंगेन दोषमृच्छत्यसंशयं संनियम्य तु तान्येव ततः सिद्धिं नियच्छति न जातु कामः कामानामुपभो
गेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते यश्चैतान्प्राप्नुयात्सर्वान्यश्चैतान्केवलांस्त्यजेत् प्रापणात्सर्वकामानां प
रित्यागो विशिष्यते न तथैतानि शक्यंते संनियंतुमसेवया विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः इंद्रियाणां तु सर्वेषां यद्ये।

म
पा.
२

क्षरतीन्द्रियं ततोस्य क्षरते प्रज्ञा दृतेः पादादिवोदकं वशीकृत्वेन्द्रियग्रामं संनियम्य मनस्तथा . सर्वान्संसाधयेदर्था दक्षावामोग
न्नमतं सेवेत मात्मनियमां ब्रह्मचारी गुरौ वसन् संनियम्येंद्रियग्रामं तपो वृद्ध्यर्थमात्मनः इंद्रियाणां विचरतामिसार भोक्तार्थमान
केवलं ब्रह्मचारिणोपि त्वितरेषामपि भवंति अथोत्थानविधिः तत्र विष्णुः ब्राह्मे मुहूर्ते उत्थाय मूत्रपुरीषोत्सर्गं कुर्यादिति ब्राह्ममु
हूर्तलक्षणमपि पितामह आह रात्रेस्तु पश्चिमे यामे मुहूर्त्तो ब्राह्म उच्यते पश्चिमे यामे पश्चिमार्द्धप्रहरे अंगिराः उत्थाय पश्चिमे
यामे रात्रेराचम्योदकं अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जितः कुर्यान्मूत्रपुरीषे
तु शुचौ देशे समाहितः आचमनस्याप्याचमननिमित्तेष्वपि तृणैरयज्ञियैः तृणग्रहं काष्ठादेरप्युपलक्षणार्थं तिरस्कृत्योच्चरेत् ए
काष्ठपत्रलोष्टतृणानि वेति मनुस्मरणात् पराशरः ततः प्रातः समुत्थाय कुर्याद्विण्मूत्रमेव च नैऋत्यामिषुविक्षेपमतीत्याभ्या
धिकं भुवः ग्रामात्क्रमशतं गच्छेन्नगराच्च चतुर्गुणं याज्ञवल्क्यः दिवासंध्यासु कर्णस्थो ब्रह्मसूत्र उदङ्मुखः कुर्यान्मूत्रपुरीषे तु
रात्रौ चेद्दक्षिणामुखः यमः प्रत्यङ्मुखस्तु पूर्वाह्णे अपराह्णे प्राङ्मुखस्तथा उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः देवलोपि
सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः विमूत्रमाचरेन्नित्यं संध्यासु परिवर्जयेत् संध्यास्ववर्जने निरुद्धेतरविषयं नवेगंधार

येनोपकृतः क्रियां कुर्यादिति मनुस्मरणात् दिङ्नियमे विकल्पो ज्ञेयः यच्च मनुनोक्तं छायायामन्धकारे वा रात्रावहनि वा द्विजः
यथासुखमुखः कुर्यात् प्राणबाधभयेषु चेति तन्नीहाराद्यन्धकारजनितदिङ्मोहविषयं विष्णुः घ्राणास्ये समावेष्ट्य सित्वाम्र।
हारीग्रीवायामासज्योच्चरेत मूत्रपुरीषे मृत्तिकाभावी ग्रीवायामुपवीतमासज्य अङ्गिरः कृत्वा यज्ञोपवीतं तु पृष्ठतः कण्ठल।
म्बिते विण्मूत्रं तु गृही कुर्याद्यद्वा कर्णे समाहितः कर्णे निधानमेकवस्त्रविषये तथा च सांख्यायनगृह्ये यद्येकवस्त्रो यज्ञोपवीतं।
ला कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यादिति हारीतः उच्चारे मैथुने चैव प्रस्रावे दन्तधावने स्नाने भोजनकाले च षट्सु मौनं समाचरे-
त् उच्चारे पुरीषोत्सर्गे विष्णुपुराणे हृतवासयान्मूत्रं पुरीषं च विसर्जयेत् पादावसेचनोच्छिष्टनिक्षिप्यश्वगृहांगने हृहद्दि
मुः अन्तर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जितः मनुः वाय्वग्निविप्रमादित्यमपः प-
श्यंस्तथैव गाम् न कदाचित्कुर्वीत विण्मूत्रस्य विसर्जनम् न फालकृष्टे न जले न चित्यां न च पर्वते न जीर्णदेवायतने न वा।
ल्मीके न ससत्त्वेषु गर्तेषु न गच्छन्नपि च स्थितः न नदीतीरमासाद्य न भस्मनि न गोमये न च पर्वतमस्तके इति पाठेऽप्य-
वैवं ग्रहणे नैव तन्मस्तके सिद्धावपि पर्वतग्रहणाद्दोषाधिक्यं द्योत्यते तद्भावेऽत्र असंतानंतस्पर्शदोषाभावप्रतिपादनार्थमस्य।

ला ६

म.
ग.
४

तं। विष्णुपुराणे उत्सर्गे वै पुरीषस्य मूत्रस्य च विसर्जने तिष्ठेन्नातिचिरं तत्र नैव किंचिदुदीरयेत् अथ शौचविधिः याज्ञवल्क्यः
गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः उद्धृतैरिति जलोपादाननिषेधः गंधलेपक्षयक
रमिति सर्वसाधारणं शौचं वक्ष्यमाणसंख्यानियमस्त्वदृष्टार्थः दक्षः शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः शौचाचा
रविहीनस्य समस्ता निष्फलाः क्रियाः यमः नाहरेन्मृत्तिकां प्राज्ञः कूलात्ससिकतां तथा कूलग्रहणमनुपहतदेशोपलक्षणा
र्थं वापीकूपतडागेषु नाहरेद्बाह्यतो मृदं आहरेज्जलमध्यात्तु परतो मणिबंधनात् शातातपः शुचिदेशात्तु संग्राह्या शर्क
राश्मादिवर्जिता रक्ता गौरा तथा श्वेता त्रिविधा मृत्तिका स्मृता काश्यपः विप्रे गौरमृदः प्रोक्ताः क्षत्रे रक्तास्तथोदिताः वै
श्यस्य हरिताः प्रोक्ताः कृष्णाः शूद्रयोस्तथा विष्णुपुराणे वल्मीकमूषकोत्खातां मृदं नांतर्जलं तथा शौचावशिष्टां गेहा
च्च मृदः शौचे विवर्जयेत् मनुः आहृतामन्यशौचार्थं वालुकां पांसुरूपिणीम् न मार्गान्नोषमनाश्च नादद्यात्कुरुतः क्वचित्
यस्मिन्देशे च यत्तोयं या च यत्र च मृत्तिका सैव तत्र प्रशस्ता स्यात्तया शौचं विधीयते मृत्संख्यानियममाह दक्षः एका लिंगे करे तिस्र
उभयोर्मृद्द्वयं स्मृतम् कर्तव्यमेव एतन्मूत्रशौचविषयं एका लिंगे करे सव्ये तिस्रो द्वे हस्तयोः मूत्रशौचं समाख्यातं शुक्रे तु द्विगु

द्वयोः

णोस्मृतमिति शातातपवचनात् विट्शौचे त्वनुक्तो विशेषः एका लिंगे गुदे तिस्रस्तथैकत्र करे दश उभयोः सप्त दातव्या मृदः
शुद्धिमभीप्सतेति एतच्च विशिष्टशौचे पर्यवस्यति पुरीषोत्सर्गे मूत्रोत्सर्गस्य नांतरीयकत्वात् विष्णुपुराणे एका लिंगे गुदे तिस्र
स्तेन तथा वामकरे दश उभयोः सप्त दातव्या मृदः शौचोपपादकाः यमदत्तौ द्वे लिंगे मृत्तिके देये गुदे देयं च करे दश उभयोः सप्त
दातव्या इति शावः मेहनेन मृत्तिकास्सप्त लिंगे द्वे परिकीर्तिते एकस्मिन्विंशतिर्हस्ते द्वयोर्ज्ञेया चतुर्दश तिस्रस्तु मृत्तिका दे।
याः कर्त्तुर्वेन स्वशोधनम् तिस्रस्तु पादयोर्देयाः शौचकामस्य सर्वदा शौचमेतद्गृहस्थानां तथा गुरुनिवासिनां द्विगुणं साद्वन
स्थानां यतीनां त्रिगुणं स्मृतं मृत्तिकाश्च उद्दिष्टा त्रिपर्वी पूर्यते ययेति अत्र मृत्तिकाधिक्यं यत्नेन मूत्रपुरीषानिर्हरणं शौचा।
योयदा त्वेवमपि गंधलेपक्षयो न भवति तदोर्द्ध्वं संख्यातिक्रमेणापि कार्यं यन्मनुः यावन्नापैत्यमेध्याक्तो गंधो लेपश्च तत्कृतः
तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु इति हस्तशौचे तु हारीतविशेषमाह दशसव्ये षट् षट्छेसप्ताभ्यां तिसृभिः पादौ
प्रक्षालयेदिति षट्षट्सव्यपश्चाद्भागे लिंगशौचे तु प्रमाणमाह दक्ष लिंगे तु प्रमाणमाख्याता त्रिपर्वी पूर्यते ययेति विट्शौचे
तु मनुः अर्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता द्वितीया च तृतीया च तदर्धार्धा प्रकीर्तिता एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचा

आ॰ पा॰ १५

दिर्णा वानप्रस्थस्य त्रिगुणं यतीनां तु चतुर्गुणं न्यूनाधिकेन कर्तव्यं शौचं सिद्धिमभीप्सता प्रायश्चित्तेन युज्यते विहितातिक्रमे कृते
वा कलः नीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा कथमप्युद्धरणाभावादित्पुराणे रत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनु
द्धृते पश्चाच्छोधयेत्तीर्थमन्यथात्वशुचिर्भवेत् दक्षः यद्दिवा विहितं शौचं तदर्धं च निशि स्मृतं तदर्धमातुरे प्रोक्तमातुरस्या
र्धमध्वनि आदित्यपुराणे स्त्रीशूद्रयोरर्धमानं शौचं प्रोक्तं मनीषिभिः यो विण्मूत्रोत्सर्जनायोपविष्टः मन्त्रकृतोति तस्यापि
शौचमाह वृद्धपराशरः उपविष्टस्तु विण्मूत्रं कर्तुं यस्तु न विन्दति स कुर्यादर्धशौचं तु स्वस्य शौचस्य सर्वदेति यत्र संख्याया
ध मत्वेनार्थकरणास्तु संभवस्तं मध्यं मृदर्थपरिमाणग्राह्याः अतः कुर्याद्यथाशक्ति स्वस्थः कुर्याद्यथोदितम् बालः
स्यादुपनीतस्य गंधलेपक्षयावधि ना वृद्धपराशरः अरण्ये निर्जले रात्रौ चोरव्याघ्राकुले पथि कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो
न दुष्यति मृदादिहस्ते धारयित्वा न दुष्यतीत्यर्थः अस्मात्वन्यथार्थवर्णयंति एवंविधस्थले अदनीयद्रव्यं हस्ते गृहीत्वा मूत्र
पुरीषकरणेपि द्रव्यं शुद्धमेवेति तद्द्रव्यहस्ते गृहीत्वैवाचमने कृते शुद्धं भवतीत्यर्थः भोजनकाले तु शुद्धस्याप्यविशेषमाह
दक्षः स्मृतिः अंजानस्तु विप्रस्य कदाचित्स्रवेद्गुदं उच्छिष्टमशुचित्वं च तस्य शौचं विधीयते पूर्वं कृत्वा तु शौचं तु ततः पश्चा

॥

वि

ंडगसृष्टेषोत् ततः हस्तौ पवासं चर्यं वगवेन शुद्ध्यतीति विप्रग्रहणमुपलक्षणार्थं शौचे हस्तनियममाह देवलः धर्म
विद्दक्षिणं हस्तमधःशौचे न योजयेत् तथा च वामहस्तेन नाभेरूर्ध्वं न शोधयेत् अत्रेदं विचार्यं विण्मूत्रयोर्मिलितयोरेकत्र
करणे एकालिंगमगुड इतिस्वइमेतत्सर्वं तत्र आहो स्वित्प्रत्येककरणेऽपीति प्रत्येककरणे नावश्यं युक्तं केवलमूत्रोत्सर्गे वा तात
एवकाविरोधात् वचनं तु एकालिंगकरे मध्येति सोहद हस्तयोर्द्वयोः मूत्रशौचे समाख्यातमिति अथ केवलपुरीषोत्स
र्गविषयत्वमुच्यते लिंगशौचं विना तदभावेऽपि नैमित्तिकं तच्छौचमापद्यते तच्चायुक्तमदृष्टार्थत्वप्रसंगात् वचनाद्दलीः
यत्तेऽपि चेत्त्वेकालिंगइत्यस्यास्य केवल ... त्सर्गविषयत्वेनाप्युपपत्तेः अरातिकाङ्क्षीयांगति यादृष्टकल्पनं अतो वाणि
ष्ठोत्सर्ग एवेति युक्तं तत्रापि लिंगशौचं पूर्वं वचनप्रतीतिक्रमातिक्रमे कारणाभावात् सन्निहितत्वात् प्रथमतएतदक
रणमाद्यान्मूत्रलेपस्य मणिबंधोपभागे संसर्गप्रसक्तेश्च हस्तपादादिशौचं तत्तद्देशकालकर्तृकाच्छौचरूपोपकारत्वे
नत्वाच्च अथ विण्मूत्रव्यतिरिक्तशरीरमलशौचं मनुः ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः यान्यधस्तादमेध्यानि
देहाच्चैव मलाश्च्युताः खानीन्द्रियाणि द्वादश मलानपि स एव वसा शुक्रमसृङ्मज्जा मूत्रविट्कर्णविण्नखाः श्लेष्माश्रु दूषिका स्वेदो

दोहादशैतेनृणांमलाः वसाकायं[illegible] मज्जाशिरोभवंमेदः कर्णविट्का[illegible]मेदृषिकादिमलं एतेतपद्यातेबौधायनश्चाह आद
दीनत्पूर्वोपस्थाम्[illegible]द्धत्पूर्वेषुशुद्धये उत्तरेषुषद्स्वाद्भिः केवलाभिर्विशुद्ध्यतीति मनुस्तु विण्मूत्रोत्सर्गशुद्ध्यर्थंमृद्वार्यादेयम
र्थवत् देहिकानांमलानांतुशुद्धिषुद्वादशस्वपीति विण्मूत्रमुत्सृजतेयेनतत्राहरणंततःशुद्ध्यर्थंस्त्रर्थवस्रयोत्तनवत् एवंचबौ
धायनमनुर्वचनयोर्विकल्पः सर्वदेशकालाद्यपेक्षया तथाचबौधायनः देशंकालंतथात्मानंद्रव्यंद्रव्यप्रयोजनं उपप
त्तिमवस्थांचज्ञात्वाशौचंप्रकल्पयेत् शङ्खः मृत्तिस्तिस्रः पादयोस्ताः हस्तयोस्तिस्रएव मृदः पंचदश[illegible]मेध्रेहस्तादीनांविशेष
ः एतदात्मीयमूत्रादिस्पर्श[illegible]मृदाहृतं उत्सर्गकालादन्यत्रपरकीयेतुपद्यते परशौचजेनसंस्पर्शेदेनोविण्मूत्राह
गेतथा चतुर्णामपिवर्णानांछात्रिंशन्मृत्तिकामता विष्णुः नाभेरधस्तात्प्रस्रावाहुषुचकायिकैर्मलैः सुराभिर्मद्यैर्वोप
हतोमृत्तोयैस्तदंगंप्रक्षाल्याचांतः शुद्ध्येत् अन्यत्रोपहतोमृत्तोयैस्तदंगंप्रक्षाल्यस्नात्वैवशुद्ध्येत् इंद्रियोपहतस्तूपोष्यस्नात्वापंचग
व्येनदूष्यनोच्छेदोपहतश्चेति इतिशौचप्रकरणं अथाचमने तत्रवृद्धपराशरः कृत्वाथशौचंप्रक्षाल्यपादौहस्तौचमृज्जलैः
[illegible]बद्धशिखकच्छस्तुद्विजआचमनंचरेत् प्रचेताः अनुष्णाहतश्चीनाभिराचमेदिति आतितरामनुस्मोदकमप्यविरुद्धं ॥

...चामेत्सन्मुखः उदकेनांतितदग्रेणोतत येस्मैनो स्पापायिनामिति अत्राचमनं भवतीति शेषः योगीश्वरः अंतर्जानुः शुचौ देश
उपविष्ट उदङ्मुखः प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च प्रजापतिपितृ।
ब्रह्मदेवतीर्थान्यनुक्रमात् दक्षः प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदंबु वीक्षितं संहत्यांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं वी।
क्षितमित्येतदद्विषयं राज्ञा वृद्धीक्षिते नैव शुद्धिरुक्ता मनीषिभिरिति यमस्मरणात् मनुः त्रिराचामेदपः पूर्वं द्विः प्रमृज्या
त्ततो मुखम् खानि चोपस्पृशेदद्भिरात्मानं शिर एव च गौतमः त्रिश्चतुर्वाप आचामेदिति चतुर्ग्रहणं देवपित्र्यकर्मापेक्ष
यानेके वित् त्रिग्रहणेन तुष्टाभावइत्यन्ये भरद्वाजः संहत्यांगुलिभिस्तोयं गृहीत्वादातिणेन तु अङ्गुष्ठकनिष्ठे तु शेषे
णाचमनं चरेत् ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन कायं प्राजापत्यं त्रै
दशिकं दैवं यस्मिन्नाचमनं प्रयोगे यद्ब्रह्मादितीर्थं स्वीकृतं तेनैव सप्रयोगः कार्यो नेतरेण दक्षः संहतांगुलिभिः पूर्वमास्य
मेवमुपस्पृशेत् अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चादनंतरम् अंगुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पुनः पुनः कनिष्ठांगुष्ठयो।
र्नाभिं हृदयं तु तलेनैव सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् याज्ञवल्क्यः अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबु



म०
पा०
१०

मुखे विप्राम्बापो ह्विरुन्मृज्य खान्यद्भिः संस्पर्शयेत् अत्र विशेषमाह पैठीनसिः सव्ये पाणौ शेषा आपो निनयेदिति शेषाश्चाचम
नावशिष्टाः हृहछं खस्वनयोपस्पर्शनमाह तर्जन्यंगुष्ठयोगेन स्पर्शनेत्रद्वयं ततः अंगुष्ठस्यानामिकाया योगेन श्रवणस्पर्शो
न कनिष्ठांगुष्ठयोगेन स्पर्शोऽस्कंधद्वयं ततः नाभिं च हृदयं तद्धस्तस्पर्शस्तु पाणितलेन तु संस्पर्शोऽत्र यथातीर्थमिति शांखः॥
ततोंगुलिचतुष्केण स्पर्शो नासापुटे ततः अंगुष्ठेन कनीयस्याः कर्णौ संयोगतः स्पर्शेत् तर्जन्यंगुष्ठयोगेन नाभिं हृदि तलेन मा
मेत् पैठीनसिः अग्निं अंगुष्ठस्य स्यात् दैवैः सर्वाणि खानि संस्पृशेदिति अत्र स्वस्वशाखानुसारेण व्यवस्थितो विकल्पः यत्र शा
खायां गस्पर्शनमेव नाम्नातं अंगुष्ठादिविशेषो वा नाम्नातस्तच्छाखीयानां त्वैच्छिको विकल्पः येषां तु स्वशाखायां कतिप
यांगस्पर्शनमाम्नातं तेषां तु स्वशाखोक्तक्रमानुसारी शाखान्तरोक्तक्रमोनुक्तांगस्पर्शो भवतीति व्यवस्था उदकपाने मा
नमाह याज्ञवल्क्यः हृत्कंठतालुगाभिर्यथासंख्यं द्विजातयः शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः अंततस्तालुगा
भिरद्भिः हृद्गातापरिमाणमाह शातातपः माषमज्जनमात्रा हृदयंगमा भवंतीति आचमनप्रसंगात् विप्राचमनेन कस्य
वाः प्रदर्पते तत्र मार्कंडेयः सपवित्रेण हस्तेन कुर्यादाचमनक्रियां नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेत् ए

१०

...णाकराभिप्राये हारीतेनवामेनिषेधात् वामेहस्तेकुशांकृत्वासमाचामतियोद्विजः उपस्पृष्टंभवेत्तेनरुधिरेणमलेनवे
...पतत्कृत्वंलवामकराभिप्राये हस्तद्वयाश्रयणगोबिलेनफलस्मरणात् उभयत्रास्थितैर्दर्भैः समाचामयतिद्विजः सोम
पानफलंतस्यभुक्त्वायज्ञफलंभवेदिति अत्रविशेषमाहहारीतः सव्यापसव्योऊर्वीतमपवित्रोकरोऽधः ग्रथियंस्यपवित्र
सततेनाचमनंभवेत् पवित्रलक्षणमाहकात्यायनः अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवच प्रादेशमात्रंविज्ञेयंपवित्रंयत्र
...चित् मार्कंडेयः चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकम् एकैकंन्यूनमुद्दिष्टंवर्णेवर्णेयथाक्रमं त्रिभिर्दर्भैः शांतिकर्म
...: पंचभिःपौष्टिकंतथा चतुर्भिश्चाभिचारार्थंकुर्याऊर्यास्मवित्रकम् अथाचमननिमित्तानितत्र...मः उत्तीर्योदकमाचा
मेदवतीर्यतथैवच हारीतः स्त्रीशूद्रोच्छिष्टाभिभाषणेमूत्रपुरीषोत्सर्गदर्शनेदेवतामभिगंतुकामश्चाचमेत् अथद्विराचम
ननिमित्तानि तत्रयाज्ञवल्क्यः स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्याप्रसर्पणे आचांतःपुनराचामेद्वासोविपरिधायच बौधा
यनः ...हवनेदानेउस्थारेचप्रतिगृहे हविर्भक्षणकालेवानद्विराचमनंस्मृतं ब्रह्मपुराणे होमेभोजनकालेचसंध्ययो
रुभयोरपि आचांतःपुनराचामेदन्यवस्त्राहृतात् अंगिराः चंडालादीन्जपेहोमेहष्ट्वाचम्यविशुद्ध्यति ...दीन्दृष्ट्वापिचाचा

१८

…र्यादक्षिणं स्पृशेत् जान्वोर्वधस्ता… छ्वादिसर्वत्राचमने उपरिष्टस्तानविधानात् उदकाभावे सामर्थ्येवाद दक्षिणकर्णे

स्य स… …नैवाभिप्रायेण बृहस्पति पितृमंत्रोच्चारे रौद्रे आत्मलंभे यथमेक्षणे अधोवायुसमुत्सर्गे आक्रंदे क्रोधसंभवे मार्जार

ति स्पृति संग्रहे… …न्नृतभाषणे निमित्तेषु च सर्वेषु दक्षिणं श्रवणं स्पृशेत् तथा आर्द्रतृणं गोमयं तां भूमिं वा संस्पृशेद् द्विजः

शुद्धात्मा प्रातः स्नायी ष्ठीवने चैव दंतोच्छिष्टे तथानृते पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत् आदित्यावसवो रुद्रा वायु

रग्निर्विततं यास्संहियात तन्नित्रिणः कर्णेनिस्थितिष्ठंति सर्वदा आचारसागरे आपोजरत्नौषधयं जस्यायक्षनंत तोहूलचर्वणे सोगंधि

…यनः यथाहतिनित्यायुद्धेष्टण: …पाजेगध्यापमनापिधानमसीत्मायैर्मंत्रैरपोनगधानन्निम्नक्षेनाचामेदित्यर्थः बौधाय

मनामंत्रनिषेधोपि तमेत्रव… …कारिणा द्विजः शुद्धाभावेपि वाक्किंचित्स्नाभूमौ जलं स्पृशेत् आपस्तंबः संध्यार्थेभो

मलोपोविगर्हित इति दक्षस्मृत्या स्त्रेतनना वामेज्यपादिहवने च यमः तावन्नोपस्पृशोद्विप्रो यावद्वामेन संस्पृशेत् वामे

पुराणे निषिध्यतीरं ऊर्ध्वपाणिः प्रभवः उदकस्थ आदकस्थः स्थलस्थस्तु स्थलेशुचि: पादौ स्थाप्या उभयत्रापि आचांतो भयतः शु

भवेतौ यवीत मासमेम… त्वाचांत उभयत्र जलस्थलकर्णिणा च शुद्धो भवतीत्यर्थः अकृत्वा पादयोः शौचं तिष्ठन्मुक्तशिखो पि १८

चांतोप्यशुचिर्भवेत् तिष्ठन्निति स्थलविषयं विस्तुनातिष्ठतो जले मग्नस्तु ज्ञानात् जान्वोरूर्ध्वं जले

त् अथ स्नात्वा छन्नकृत्वापि समाचांतो न शुद्ध्यतीति अथ स्नान्निषेधाज्ञानुदग्न्येप्यविरुद्धं तथाच

श्नन्निति अत्राचांतः शुचिर्विरिति वाक्यशेषः तथा सोमानर्केन चोत्सीषयर्यकासनयानगः उ

नुयात् नरगोखरवानाश्वहस्त्यधीरोहकस्तथा आचांतः कर्मशुद्धः स्नात्वा बूलीयपजाग्धिकृत

कालेकाम्बन नपाडकस्योनत्वरितो न चापज्ञोपवीतवान् संख्यायनः दानमाचमनो होमभो।

न कुर्वीत स्वाध्यायं पितृतर्पणम् आसनारूढपादस्तु जानुनोर्वाथ जंघयोः कृत्वावसक्थिकोपश्च

शंति बिंदवः पादौ य आचामयतः परान् भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् परेषामाचमा

नेया बिंदवः पादयोः पतंति ते नैर्नाशुद्ध्व इत्यर्थः इत्याचमनविधिः अथ प्रातः स्नानं तत्र मार्कंडेयपुराणे अ।

याः सर्वा भवंती हाफलाय वः प्रातः समाचरेत्स्नानं तच्च नित्यमिति स्मृतं प्रातः स्नानं मंत्रवर्जं मध्याह्ने मांत्रिकोऽपि

स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम् योगीश्वरः स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयमः सूर्यस्य चाप्युपस्थानं गा

...हंतव्य: योगियाज्ञवल्क्य: प्रातर्मध्याह्नयो: स्नानं वानप्रस्थगृहस्थयो: यतेस्त्रिषवणं स्नानं सकृत्तु ब्रह्मचारिण: वानप्र त्र..
...लहयेस्नानं ब्रह्मचारिणस्त्व सकृत्स्नानमशक्तविषयं अतएव याज्ञवल्क्य: दांतस्त्रिषवणस्नायीति हतस्त्र प्रतिग्रहादि
१५ ...रे स्नायात्प्रातस्त्वमध्याह्ने ब्रह्मचारी तथा गृही शंख: प्रात:स्नानं प्रशंसंति दृष्टादृष्टकरं हितत् सर्वमर्हति
...त्पापादिकं दृष्टं मलापनयनादंगशुद्धि: अदृष्टं नित्यत्वेन पापक्षय: अलक्ष्मी कालकर्णी विडु:स्वप्नं डु
उद्धा... ...डु:स्वंनित्यस्नायी न पश्यति कालकर्णी डु:सहडु:खिता नित्यस्नानेषु यं तु अपि पापकृत्तो न वा का
तिर्विंतन ...तुनिसंहृ...दंतानुर: दंतान्प्रक्षाल्य नद्यादौ गेहे चेत्तदमंत्रवत् अमंत्रवदिनि प्रात:स्नानेन सर्वा
...यन: य ...हविषेध: यत्तुपवाह्न अस्नात्वा होमकालस्य बहुत्वात्स्नानकर्मण: प्रातर्नत्वनया स्नानं हो
मनाम्नेत्रति ...अस्तेतमलिन:कायो नवछिद्रसमन्वित: स्रवत्येव दिवारात्रौ प्रात:स्नानं विशोधनं वामन
मलोपोदि ...अजलानि पूर्वोत्तराग्राणि मृदं न सेत्र प्रक्षाल्य यादौ च मुखं च कंठे यज्ञोपवीतं च जलं पिबेत्त्रि: क
पुरीणि ...आहार: एतच्चैतडक्तं भवति उपवीते निवीते कृत्वा प्रक्षालयेदिति त्रिर्जलं पिबेदाचमेदित्यर्थ: का
...अजे

१८

ग्रसंधारयेद्दर्भांशाखां बंधं विधाय च प्राणायामांस्ततः कुर्यात्कालज्ञानेन यथाविधि यथाविधिकालज्ञानं तिथिनक्षत्रादिज्ञानं कु
र्यादेतत्पूर्वः मृत्तिकां तु त्रिधा कृत्वा भागेनैकेन लेपयेत् दक्षिणेन वहस्तेन अष्टावेतान् अनुक्रमात् अष्टौ वक्ष्यमाणाः ललाटमंसहृदयं
हृदयपृष्ठमुदरं ऊरू द्विहृयं चेत्यष्टावि ज्ञेयाः ललाटमंसौ हृत्पृष्ठमुदरं च सजानुकं ततो वामकरेणैव नाभिवस्त्र जंघक्रम
द्दक्षिणादिक्रमेणैव चरणौ च त्रिभिस्त्रिभिः मृदस्तृतीयभागेन करौ च त्रिः प्रमार्जयेत् इति स्नुलीं मृदा स्नानं कृत्वा चमृज्जले।
शेत् नाभिमात्रे जले गत्वा हस्त्वा देशां दिशां द्विजः निरुद्ध्य कर्णौ नासां च त्रिः कृत्वोन्मज्जनेन तु द्विराचम्याभिषेकं कुर्या
द्दशाक्षरेण तु आयं गौरिति सूक्तेन द्विज आवर्तयेदपः जंबुकायेति मंत्रेण विदध्यात्त्वघमर्षणं जंबुकायेति नायेतियमः
अपि तु भावदृश्यादिदृष्टसूक्तानामुपलक्षणार्थं जपन्वा द्वादशवारांस्तु महापापापनुत्तये अघमर्षणक्रियया पूतपापः।
समाहितः ततो निमज्ज्य वारांस्त्रीन् ततस्तर्पनमारभेत् तर्पणमिति स्नानांगतर्पणे तथा तैत्तिरीयशाखायां ॐ भूर्देवां
स्तर्पयामि ॐ भुवोदेवांस्तर्पयामि ॐ स्वर्देवांस्तर्पयामि ॐ भूर्भुवः स्वर्देवांस्तर्पयामि एवं भूतर्षीस्तर्पयामीत्यादि एवं भूः
पितॄंस्तर्पयामीत्यादि अंते आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्विति ब्रुवन् जलांजलित्रयं दद्यादेतत्स्नानांगतर्पणमिति एवमेवम

सं॰प्रा
२

ध्याह्नस्नानमाप्ते विशेषस्त्वाह्निके प्रदर्श्यते अथ प्रातःसंध्या तत्र व्यासः प्रातःसंध्यां सनक्षत्रां मध्यमां स्नानकर्मणि सादि-
त्यां पश्चिमां संध्यामुपासीत यथाविधि मध्यमां स्नानकर्मणि सादित्यां पश्चिमां संध्यामुपासीत यथाविधि मध्यमां स्नानकर्मणि।
ति मध्याह्निकस्नाने जातस्तर्पः संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् संवर्तः अ-
थाचम्य ऊर्ध्वकुशासने समवस्थितः करसंपुटकं कृत्वा संध्यां नित्यं समाचरेत् उत्वा पुंडरीकाक्षमुपात्ताघप्रशांतये ब्रह्मव-
र्चसकामार्थं प्रातःसंध्यामुपास्महे इत्येवं कृत्वा तु संकल्पं कुशानादाय पाणिना नद्यां नगुप्ततोयेन लिहे वामकरे स्थितैः त्रि-
भिर्व्याहृतिमंत्रैश्च प्रत्येकं मिलितैस्तथैः गायत्र्या च ततः कुर्यादभिषेकं च तज्जलैः आर्षं छंदो दैवतं च विनियोगविधिस्तथैव च आ-
वाहनं च गायत्र्या प्राणायामे समभ्यसेत् गायत्रीं त्र्यक्षरां बालां साक्षसूत्रकमंडलुं अक्षरां प्रणवात्मिकां रक्तवस्त्रां चतुर्व-
क्त्रां हंसवाहनसंस्थिताम् ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम् आवाहयाम्यहं देवीं गायत्रीं सूर्यमंडलात् ॐकारस्य ब्र-
ह्म ऋषिर्ब्रह्मा देवोऽग्निस्तस्य कथ्यते गायत्री च भवेच्छंदो नियोगः सर्वकर्मसु त्रिमात्रस्य प्रयोक्तव्य आरंभे सर्वकर्मणां व्याहृतीनां तु।
सर्वासां ऋषिश्चैव प्रजापतिः गायत्र्युष्णिगनुष्टुप्च बृहती त्रिष्टुभेव च पंक्तिश्च जगती चैव छन्दांस्येतानि सप्त वै। अग्निर्वायु

जनलोकंतुहृदयेकण्ठदेशेतपस्तथा ॥२

ऽग्निर्वायुः सूर्यो बृहस्पतिरपांपतिः इंद्रश्चविश्वेदेवाश्चदेवताःसमुदाहृताः प्राणस्यायमनेचैवविनियोगउदाहृतः भूर्लोकेपा
दयोर्न्यस्यभुवोलोकंतुजानुनोः स्वर्लोकंगुह्यदेशेननाभिदेशेमहस्तथा भ्रुवोर्ललाटसंधौतुसत्यलोकंप्रतिष्ठितं सविता
देवतायस्यामुखमग्निस्त्रयात्मकं विश्वामित्रऋषिश्छंदोगायत्रीसाविशिष्यते जपहोमोपनयनेविनियोगोविधीयते व्यासः
ॐभूर्विन्यस्यहृदयेभुवःशिरसिविन्यसेत् स्वरितीदंशिखायांतुगायत्र्याःप्रथमंपदं विन्यसेत्कवचेनैवद्वितीयंनेत्रयोर्न्यसे
त् तृतीयेनास्त्रविन्यासंकुर्यात्संध्यासुनामवान्‌ः यासंध्यासचगायत्रीत्रिधाभूत्वाव्यवस्थिता पूर्वभावेतुगायत्रीसावित्रीमध्यमा
स्मृता याभवेत्साश्चिमासंध्यासाचदेवीसरस्वती आगच्छवरदेदेविअक्षरेब्रह्मवादिनि गायत्रिछंदसांमातर्ब्रह्मयोनेनमो
स्तुते कात्यायनः ॐभूर्भुवःस्वरित्यायोभिमंत्र्यपरिदिशेत् रक्षार्थमितिशेषः अथप्राणायामः तत्रयोगीश्वरः सव्याहृ
तिसप्रणवांगायत्रींशिरसासह त्रिःपठेदायतप्राणःप्राणायामःसउच्यते गायत्रीप्राहनिरुक्तिमाहव्यासः गायंतंत्रायसेयस्मा
द्गायत्रीत्वंततःस्मृतेति मार्कंडेयपुराणे प्रथमंसाधनंकुर्यात्प्राणायामउदाहृतः लघुमध्योत्तरीयाख्याःप्राणायामास्त्रिधो
दिताः तस्यप्रमाणंवक्ष्यामितदलर्कशृणुष्वमे लघुर्द्वादशमात्रःस्याद्द्विगुणःसतुमध्यमः त्रिगुणाभिस्तुमात्राभिरुत्तमःसमु

स॰
पा॰
२२

[illegible]ष्णुपुराणे प्राणाख्यमनिलंवश्यमभ्यासात्कुरुतेतुयः प्राणायामः सविज्ञेयः सबीजोबीजएवच पूरकं पूर
[illegible]कः स्थापनंकुम्भित बहिर्निस्सरणंतस्य रेचकः परिकीर्तितः सबीजोध्यानजपसंहितः सगुणोपास्तिः अबीजो
निर्गुणोपा[illegible] तत्त्वपरमहंसविषयं यथाहपराशरः सालम्बोभगवन्मूर्त्तिः स्थूलंरूपंद्विजोत्तम अनालंबमनंतस्ययोगि
[illegible]स्मृतं॥ इत्यथाकर्षयेद्वायुंमात्राषोडशमात्रया धारयेत्पूरितंयोगीचतुष्षष्ट्यात्मात्रया सुषुम्णामध्यगंसम्यग्द्वा
त्रिंशन्मा[illegible]मात्रैः नाड्यापिंगलयाचैनंरेचयेद्योगवित्प्रहात् व्यासः अंगुष्ठेनपुटंग्राह्यंनासायाःदक्षिणंपुनः कनिष्ठाना
मिकाभ्यां[illegible]यंप्राणस्यसंग्रहे अंगुष्ठानामिकाभ्यांतुग्राह्यःसर्वैर्यथर्विभिः मनुः प्राणायामाब्राह्मणस्यत्रयोपिविधिवत्कृ
ताः व्याहृतिप्रणवैर्युक्ताविज्ञेयंपरमंतपः प्राणायामत्रयंकार्यंसंध्यासुचतिसृष्वपि प्राणस्ययमनंकृत्वाआचमेत्प्रयतो
पिसन् अंतर्वासि[illegible]यस्मात्तस्मादाचमनंस्मृतं अथमार्जनं योगयाज्ञवल्क्यः आपोहिष्ठेतितिसृभिर्नमभिस्तुप्रयतःशु
चिः नवप्रणवयुक्ताभिर्जलंशिरसिनिक्षिपेत् प्रतिपादमादौप्रणवमुच्चार्यमार्जयेत्अपिनवप्रणवाभवंतीतिनवप्रणवा
युक्तत्वंभवतिब्रह्मांडे नद्यांवाप्यंह्रदेवाथभाजनेमृण्मयेथवा औदुम्बरेचसौवर्णेराजतेदारवेजलं कृत्वाथवामहस्तेवा

१८

संध्योपास्तिंसमाचरेत् एवंचवामहस्तोदकेसंध्यानिषेधवचनानिपात्रांतरसद्भावेसावकाशानि द्वैपायनः कृत्वाचाभिमु
खंतोयंदर्भैर्मार्जनम[illegible]रेत् यस्मात्तयायेतिजलंसकुशंप्रक्षिपेद्बुधः नारायणः ऋगंतेमार्जनंकुर्यात्पादांतेवासमाहितः
आपोहिष्ठेत्यस्याः[illegible]कार्यंमार्जनंचकुशोदकैः प्रतिप्रणवसंयुक्तंक्षिपेन्मूर्ध्निपदेपदे ऋचस्यांतेथवाकुर्यान्मुनीनांमतमीदृ
शं आपोहिष्ठे[illegible]तृचस्यसिंधुद्वीपऋषिस्मृतः आपोवैदेवताछंदोगायत्रीमार्जनेस्मृतम् मार्जनेतीर्थविशेषमाहहारी
तः मार्जन[illegible]लिकर्मभोजनानिदेवतीर्थेनकुर्यादिति एवंमार्जनंकृत्वासूर्यश्चमेत्यपः पिबेत् शौनकः सायमग्निश्चमे
त्युक्त्वाप्रा[illegible]सूर्येत्यपःपिबेत् आपःपुनंतुमध्याह्नेतच्चैवामनंचरेत् तत्रसूर्यश्चमेतिमंत्रस्यप्रकृतिच्छन्दोग्निर्ऋषिः सूर्या
[illegible]नेरात्रयोदेवताः प्रातःसंध्याचमनेविनियोगः केचननारायणर्षित्रैष्टुभंछन्दश्चमन्यंते अग्निश्चसूर्यश्चेतिय
कु[illegible]दको[illegible]बौधायनोपि अथातःसंध्योपासनविधिंव्याख्यास्यामः तीर्थंगत्वाप्रयतोभिषिक्तःप्रक्षालितपाणिपादोः
[illegible]मेतिसायमपः पीत्वासूर्यश्चमेतिप्रातःसवित्रेणपाणिनासुरभिमत्यालिंगाभिर्वारुणीभिर्हिरण्यवर्णाभिः
पावमानी[illegible]पीहृतिभिरन्यैश्चपवित्रैरात्मानंप्रोक्ष्यप्रयतोभवतीति सुरभिमतीदधिक्राव्णइति अस्यावामदेवऋषिरनुष्टुप्।

म॰ प्र॰ ... दधिक्रावादेवतामार्जनेविनियोगः अब्लिंगाभिः आपोहिष्ठीयाभिः हिरण्यवर्णाः शुचयः यासांमेव यासांराजा शि
शा॰ ...
२२ ... षाडितिवत्ऋग्भिः आसांत्रिष्टुप्छन्दोग्निरृषिरापोदेवतामार्जनेविनियोगः केचनात्रकश्यपमृषिंमन्यंते पाव
...भिः स्वादिष्टयेमादिभिः पावमानीनांबहुत्वादृषिछन्दोदेवतानांचभिन्नत्वाद्विस्तरभयर्नोक्तंतत्स्वरूपं छंदोगानांत
...ध्यावमगोतमोक्तौमंत्रोद्रष्टव्यौ अहस्त्वमादित्यश्चपुनात्वितिप्रातरिति रात्रिस्त्वमावरुणश्चपुनात्वितिसायमिति एतौ
प्रजापतिदृष्टौलिंगोक्तदेवतौचसंध्याचमनानंतरंनारायणः स्पृष्ट्वावाविष्णुनंतोयंमूर्ध्नि ब्रह्ममुखेनतु आपोहिष्ठेतिसू
क्तेनदर्भैर्मार्जनमाचरेत् स्पृष्ट्वाआचम्य ब्रह्मरुवेमत्रनोक्तं ॐकारःपूर्विकास्तिस्रोमहाव्याहृतयोऽव्ययाः त्रिपदाचैवगा
यत्री विज्ञेयंब्रह्मणोमुखमिति सूक्तस्त्वादिकमाहभृगुः आपोहिष्ठेतिनवर्चस्यसिंधुद्वीपऋषिःस्मृतः आद्येवसा
न्सप्तर्चोगायत्र्योह्यंतत्रुष्टुभाविति मार्जनानंतरंब्रह्माजलपूर्णेनयाहस्तनासिकाग्रेसमर्पयेत् ऋतंचेतियठित्वातंतज्
जलंत्यक्त्वानोदिपेत् यमः गृहीत्वापाणिनावारिस्पर्शावाघ्रामवेजयेत् बिभृयान्नासिकाग्रेनुनिरुध्यप्राणमारुतं य
एवंद्रुपदांनित्यंत्रिरहः प्रयतोजपेत् नचतिष्ठंतिपापानितस्यदेहेद्विजन्मनः इति ऋतंचसत्यंचेतिसूक्तंचाघमर्षणं

स॰पा॰ सोनसहगमनेनामिनेनाम्नजातियेवैकत्वेपिण्डैः ण्यांश्राद्धंसमासेनसंबंधेपेणयथाहिः पितृकश्राद्धेए
१९८ कस्मिन्पिंडेद्वयोरप्युद्देशः एवमत्रापिद्वावुद्दिश्य ब्राह्मणान्भोजयितव्याः पिंडान्निर्वपणमपिद्वावु
अ३ द्दिश्य एवमेकदेवश्राद्धंप्रकरणात्समासः अत्रैवैष्वदैविकमपितंत्रेणैव पार्वणश्राद्धपक्षेस्नाहनीति
विशेषोपादानात्सजातिः भेदेसत्यनसमासेनश्राद्धं किंतुपृथगेव स्नाहनिसमासेनापिपिण्डनिर्वपणं
ज्यायादि त्रादन्वारोहणेनेकतिथिस्नजयोर्दंपत्योः सांवत्सरिकव्यतिरिक्तंनैश्राद्धंसपिंडीकरणेवान्व ८५
ष्टकादिश्राद्धेष्वन्यार्द्धचन्नांजरवशान्नपृथक्कृतेव्यतापाप्रात्ताप्यांनवश्राद्धंपृथगेविति केवलनवश्राद्धस्यै
वपार्थक्यविधेः पतिसह्यपेननवश्राद्धेषुपृथक्त्वनिषेधात्सांवत्सरिकदेवषोडशश्राद्धादिष्वपिसमासे
नैवानुष्ठानं नापिएकीकरणंपृथगेवभर्तृपिण्डेनतत्पिण्डयोजनविधानबलात् अमावस्यादिष्वपि
स्प२ पृथक्त्वात्श्राद्धस्यमातृत्वेभावादेवनपृथक्करणं किंतुसहैव अयंतुविशेषः षोडशश्राद्धादिषुमातापि
त्रोः पृथग्देवतात्वं अमावस्यादिषुतुपितृपिण्डेनैवसपत्नीकस्यात्वोद्धारणेनमातुरपितृत्वसिद्धिरिति
अमावस्यादावपियेषांपितृव्यानांमातापित्रोरपिपृथग्देवतात्वंपृथक्श्राद्धविधिस्तेषांतत्रैवेतिवि॰ १९८

स्वामिभिर्मिताक्षराटीकायांसुबोधिन्यामाचाराध्याये यदामातापित्रोःश्राद्धमनेकसांवत्सरिकाणांयु
गपत्सन्निपातस्तदापूर्वमृतस्यश्राद्धंततोमातुःश्राद्धमन्येषामिति मुख्यानोपसर्जनतरतमभावेनसांवत्सरि
कंकुर्यात् यत्तुनर्मदाप्रोक्तं एककालेगतासूनांबहूनामथवाद्वयो तंत्रेणश्रपणंकुर्यात्श्राद्धंचैवपृथक्
पृथक् पूर्वस्यचमन्नतस्मादोद्वितीयस्यततः पुनः तृतीयस्यततःकुर्यात्सन्निपातेत्वयंक्रमइति पूर्वक
स्यमृतस्यद्वितीयस्यमृत्योपेक्षयाजघन्यस्यतृतीयस्यजघन्यतरस्येत्यर्थः अत्रापक्रमः पितृब्राह्म
णानिमंत्रणान्तंतंमातृब्राह्मणानिमंत्रणंततोयन्निमंत्रणंएवंपादप्रक्षालनादिविसर्जनान्तंकुर्यात्
एतच्चपैठीनसिवचनेनैवश्राद्धकरणेकुतपादिश्राद्धकालातिपातप्रसक्तौद्रष्टव्यं श्राद्धकालानतिपा
तेतुपृथक्पाकेनपर्यायेणक्रमेणैकमेवपृथक्पृथक्कार्यम् यत्तुमत्स्येनप्रोक्तं नैकंश्राद्धंयंकुर्यात्समा
सेहानिकुत्रचिदिति तदेकस्मिन्नेवनिमित्तेपुनः श्राद्धंनकर्तव्यमित्येवंपरं नतुनिमित्तभेदेऽपि
यदातुभर्तुर्मरणतिथौएवसहगमनंपत्नीक[illegible]सांवत्सरिकेलौगाक्षिणाविशेषोदर्शितः मृता
हानिसमासेनापिंडानिर्वपणंपृथक् नवश्रा[illegible]दंपत्योरन्वारोहणेएवतु अस्यार्थः दंपत्योरन्वारोह

तन्मतेः श्रोत्रिणा इति द्विमवदता एतच्चकत्वमार्पैत[illegible]तिर्वा ये पितृपक्षे द्वामुष्यायणाः पितृपितामह
प्रपितामहपिंडेषु द्वौ द्वावनुकीर्तयेत् द्वितीये द्वि[illegible]ड पितामहपिंडे पुत्रो द्वामुष्यायणास्सर्वं वनुकी
र्तयेत् नापितृपिंडे तृतीये इति प्रपितामहपिंडे स्यात्पुपलक्षणं अतो द्वामुष्यायणपुत्रः प्रपितामह
पिंडे द्वावनुकीर्तयेत् यदि द्वामुष्यायणपौत्रः श्राद्धकर्ता तदा कथमित्याकांक्षायामाह तृतीये इति पौ
द्वामुष्यायणस्य तृतीये प्रपितामहपिंडे द्वावनुकीर्तयेत् नापितृपिंडे नापितामहपिंडे जीवत्वाचक्षा
णः पित्रादिपिंडाननुवदन् लेपभुक्षु द्वौ द्वावनुकीर्तयेत् अतएवसममपर्यंतामित्यन्यमतं श्रोत्रि
णः एवमुद्देशः पश्चाद्दीजिन इति क्रमः एतत्सर्वोसौ च प्रकरणे भिहितम् पुत्रिकापुत्रो द्विधा मातामहे
नैव संबद्धो मातामहेनापि त्राचसम्बद्धश्चेति तत्र मातामहेन संबद्धस्य श्राद्धक्रममाह मनुः मातुः प्रथ
मतः पिंडं निर्वपेत्पुत्रिकासुतः द्वितीयं तु पितुस्तस्यास्तृतीयं तत्पितुः पितुः उभयसंबद्धो वर्गद्वय
स्यापि कुर्यात् इत्याहोशनाः मातामहस्यांतु मात्रादिपैतृकं पितृ एवं क्रमम् मातुश्चः पितृतो यस्माद्
धिकारोस्ति यमितः अत्र विशेषमाह ऋष्यशृंगः यः स्यादुभयसंबद्धः पुत्रिकायाः सुतो ह्यसौ सर्वे २००

सर्वोक्तविषयेयोऽप्याति नत्वमन्नादहानिसमासेनापिएकानिर्वपणमितेतनहवचनबलान्नताहादिश्राद्धा
ह्वनीयार्थोपविष्ट एकस्मिन्ब्राह्मणे एकस्मिन्पिण्डेद्वयोर्देशोनसमासः संक्षेप[illegible]तिवत्मकं संक्षेपश्च
ब्राह्मणभेदेपिपिण्डभेदेपिवर्तते तद्यथाएकश्राद्धनिमन्त्रब्राह्मणचरणक्षालनमन्त्रमितरश्राद्धनिमु
न्त्रचरणक्षालनमेकत्रासनादिकं तत्त्वेतरत्रासनादिकमित्यासमासेवंक्रियमाणोपिसंक्षेपोपपन्नोरि
तिचेन्मैवं समासेनापिपिण्डनिर्वपणमितिपिण्डनिर्वपणोपिसंक्षेपोदर्शितः एवंपत्नीकरीत्याक्रि
यमाणेपिण्डस्याभिन्नत्वान्नत्रसमासोनवर्तते निरपेक्षत्वस्समासशब्दउपात्तः सर्वसर्वात्मनासंक्षे
पयोग्यस्त[illegible]दैविकर्तव्यं संक्षेपंप्रतिपाद्यतिवाधकाभावात् तस्मात्सर्वैतिकर्तव्यतानुस्मृतः सं
क्षेपएवांगीकार्यः तथाच द्वैपित्रकश्राद्धवदेवसंक्षेपइतिसिद्धं अथद्विपितृश्राद्धं तत्रहारीतः नाद्वे
वैवीजसंयोहितउभयदर्शनादुभयोरपत्यमितिपरेषामुत्पादयितुः प्रथमः प्रवरोभवति द्वौद्वौपिण्डौ
प्रतिर्वापेदथुरेकपिण्डेवद्धावप्रकीर्तयेत् द्विती[illegible]त्नीयपौत्रोलेपिन्नपश्चेत् [illegible]च्चावचनाणश्रा
ड्ढमादित्येकइति तेषांबीजिक्षेत्रिपितृणांमध्ये[illegible]यितुर्बीजिनः परमार्षेयंप्रवरंप्रवरंनिर्दिशे

म॰प्र
१२८

पकस्थगेवक्तंतेयोनार्थः नवश्राद्धं सपक्वान्नेनकर[illegible]रोवचनेन द्योतितं नवश्राद्धेषुपञ्चिंशग्रहणेऽपि
तेच यत् दश्मन्तोर्भक्षाशीष्टेनननतन्दुजीनकार्हं चि[illegible]तनर्भृश्रणोक्ते यासमारोहणंअर्याम्नर्तोष्ठिर्यांपति
व्रता नामन्नाहनिमंपामेश्यकिपिण्डेनियोजयेत् प्रमबद्धं च नवश्राद्धं युगपत्समापयेदिति तन्मर्त्तमृत
तिथिव्यतिक्रियायातियावन्नारोहणामृतविषयम् नवश्राद्धं तद्युगपद्दिनस्यापमर्थः प्रथमेपि तन्नवा
श्राद्धोपविष्टस्याश्रुपाणसपानवेलालनेपश्चान्मात्नवश्राद्धोपविष्टस्येवं क्रमेणविसर्जनांते सन्त्याकुगण
नश्राद्धद्वयं समापयेदिति यदा त्वेकस्यामेव तिथौ एवं दिनभागे भर्तुर्मरणं मृतेरादिनभागे पत्न्या अन्वारोहणे
नमरणं तदापि समासेनैव पिण्डादि विजयवाक्यबलान्मृततिथेरैक्यान्मृतेः प्राधान्यात्तदर्थशरीरमृताया
अपितदेवमृतप्रायत्वाद्बहुनाममतुग्रहोनाप्यइतिभिन्नदिनमरणरूपैकनिमित्तापेक्षयाऽपूर्वोत्पत्तानेकान्
रोधस्यन्यायत्वान्नदिनप्रभृत्येवदिनगणनांकृत्वातिलोदकपिण्डदानाशौचैकादशाहादिकं कार्यं ८
वेवयानि वाक्यानि भर्तुर्मरणानन्तरं चिरकालव्यवधानेनान्वारोहणम्नाया अयंभार्याया भर्तुर्मरणस
मकालमेव मरणप्रतिपादकान्यर्थवादरूपाणि वाक्यानि चिन्तामणिरत्नावल्यादिषु प्रदर्शितानि तानि १२८

ज्ञेयम् केचन नवश्राद्धशब्देन षोडशश्राद्धानां सपिंडीकरणस्य चोपलक्षणं ग्रहणमिच्छंति दम्पत्योरिति
पदोपादानादेकचित्यारोहणाधिकारित्रिवर्णसापत्नमात्रामात्रभ्यां मातृभिर्वान्वारोहणकृते पतिप
त्न्योर्मृततिथ्यैरेकत्वे पूर्ववत्समासे नवश्राद्धव्यतिरिक्तं सर्वं भवेत् एकस्मिन्नाहस्यैनीयस्थानीयश्राद्ध
णोऽह्निश्राद्धदेशः तथैकस्मिन्नेव पिण्डेऽपि यथा हि त्रिपितृकस्य स्त्रस्यां यो जातनये पुत्रस्तस्मै पुत्रो भविष्य
तीति समयं विधाय या विवाहिता ततो न पत्न्या याऽवत्तस्यां भर्त्रैव अन्येन नियोगेन देवरादिभ्यः पुत्रोत्पाद
नसमये उत्पादयन्तु नः पुत्रश्चावयोरपीत्यपि संकेतेन जातोत्पन्नः पुत्रस्त्रिपितृकः एको मातामहः परः
-स्त्वाधिपतिः [illegible] बीजी [illegible] त्रयः पितरः तस्यामावस्यादौ यथा त्रयोर्द्दयोनेकः पिण्डोऽस्त्यथा हि श्राद्ध
देशो नाप्येक एव पिण्डो देयः स्यात् यदि सनन्त्यारोहण एवायं नियमस्तदापि त्रौ विति ब्रूयान्न दम्पत्योरि
ति तस्मात्पूर्वोक्त एव निर्णयः यश्च स्मृत्यंतरे एकचित्यां समारूढौ दम्पती निधनं गतौ पृथक् श्राद्धं त
योः कुर्यादोदनं च पृथक् पृथक् इति तन्नवश्राद्ध मा[illegible]विषयं नवश्राद्धं गापिण्डदानं ये[illegible]न्नैव तेषा
पिण्डा[illegible]नोपि पृथग्देवेत्यर्थः अथवा नवश्राद्धमे[illegible]वापेक्षान्नेन[illegible]यदा स्त्रियते तदेकतमपि ह

म॰ प्र॰
२१०

ग्रहणस्मरणादीनि दैवेनैव हि कारयेत् ज्येष्ठो [illegible] व ग्मान्करायाग्रापवित्रकान् कृत्वार्घ्यसंप्रदानत्वं तै
तस्मात्प्रदीयते ज्येष्ठो न रोति द्वयोर्द्वयोर्भ्रात्र [illegible] र्द्विस्तो मेलयित्वा तत्रापि ज्येष्ठस्य प्रथमोपवेशिनस्य हस्त
मुपरि कृत्वार्घ्यदानं कार्यमित्यर्थः कात्यायन एव स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मणि पिंडानो
द्वहनांतेषां तस्याभावे तु तत्क्रमात् पितुरभावे ज्येष्ठभ्रात्रादिकर्तृक्रमेणेत्यर्थः आउद्वहनाद्विवाहपर्यंतं
जीवति [illegible] पिता पुत्रः [illegible]य द्वितीयविवाहस्य संस्कारकर्मत्वाभावात्पितुरावश्यकत्वाभावेन ताद्दशा विवा
हे स्वपुत्रजातकर्मादिष्वपि नान्दीमुखश्राद्धकर्ता तदा पितृमातृभ्यः पितृपितृभ्यः पितृमातामहेभ्य एव
दघा५ वदद्यात् येभ्य एव पिता दद्यात्तेभ्यः सुपितृकः इति नियमात् केचनैवं वर्णयंति येभ्य एव पिता दद्यादित्यस्या
यमभिप्रायः पिता स्वपित्रादिभ्यः स्वमातामहादिभ्यश्च यथा ददाति एवमसावपि स्वसंबंधिनामेव
दद्यादिति तदनुपपन्नं श्रवयत्तच्छब्दनिर्देशे न सर्वशब्दनिर्देशः येभ्य एवेत्यादिना पितृप्रतियो
गिका एव गृह्यन्ते न स्वप्रतियोगिकाः तस्मात्पितृसंबंधिन एव मातृमातामहादयो ग्राह्याः तथा तेभ्यः
पूर्वे तरा ये च प्रजावंतः स्वपितरः तेन नान्दीमुखा नान्दीमुखा इति कथ्यन्ते इत्यस्मिन्प्रकरणे पूर्व २१०

म२

न्यायसाम्यात् एवं पार्वणे ऽसौ पित्रादिषु त्रिषु विद्यमानेषु नापितृवर्गे नान्दीश्राद्धं एवं चान्यश्राद्धादिषु
प्रीतिनद्दस्तद्वशाणावचनपरिज्ञानानिर्बंधनामित्युपेक्षणीयम् अथवृल्लायवः विश्वेदेवाः इदं वो ऽर्घ्यं नान्दी
मुखाः पितरः इदं वो ऽर्घ्यमित्ययथालिंगमर्घ्यदानं पाणौ होमो ऽग्नये कव्यवाहनाय स्वाहा सोमाय पितृम
ते स्वाहेति मधुवाता इति त्रुचस्यानेउपास्मै गायतेति पंच मधुमतीः श्रावयेत् अन्नं नमीमदंतेति षष्ठी
म् श्राविते भुक्तवत्सु आचान्तेषु गोमयेनोपलिप्ते भुव प्राचीनाग्रान्दर्भान्संस्तीर्य तेषु पृथगाज्यमिश्रेण
कौशेयणीकैः सहौ द्वौ द्वौ पिंडौ दद्यादिति भुक्तशय्यागुक्तमदेशः भोजनशालायां बहिर्वा दद्यात् ह
दुरासाता [illegible] मदद्यात् [illegible] पिंडान् द्वौ नाम्ना सव्याहृतः वाहृतः वाहृतः शालातो बहिः श्राप्व
लायनेन प्रतिवर्गं द्वौ द्वौ दर्शितो ब्रह्मपुराणे नामि श्रीफलकव्याहृवचनः पिंडान् श्रीफलसन्निभानिति
याचकः सव्यासाव्वदृ [illegible] पलद्वयमाचत्वारि पिंडानि मते एकेनाम्ना परं तु संदद्यात् पिंडान्यथावद
यह एकैकस्मै द्वौ द्वौ पृथग्दद्यात् एकेनाम्ने [illegible] एवं कमपरं तु स्त्रीमित्यर्थः अर्घ्यदाने विशेषका
त्यायनेनोक्तः गोत्रनामभिरामंत्र्य पितृन् [illegible] वेदयेत् नात्रापसव्यकरणं [illegible] नीर्यामिष्यते पा

म॰ मु॰ — ह: नान्दीमुखान्पितॄनावाहयिष्य इति पृच्छेत् [illegible]न्दीमुखान्पितॄन्वाचयिष्ये इति पृच्छति नान्दीमुखाः पि
२०९ तरः पितामहाः प्रपितामहाश्च प्रीयन्तामिति [illegible]म वृंजीत युग्मान्नाशयेदिति अत्र नान्दीमुखाः पितरः
ति मातृ: एवं मातामहेनापि प्रदर्शितार्थं यत्तु ब्रह्मपुराणे चतुर्थादिलेपभाजो नान्दीमुखदेवतात्वमुक्तं
पितृपितामहश्चैव तथैव प्रपितामहः त्रयोप्यश्रुमुखा एते पितरः परिकीर्तिताः तेभ्यः पूर्वतरा ये च प्र
जावंतः सुखे[illegible]धिताः ते तु नान्दीमुखा नान्दी समृद्धिरिति कथ्यते इति तज्जीवपित्रादित्रितयस्य श्राद्धकर्तु
र्हि श्राद्धे देवतात्वसिद्ध्यर्थं मत्स्यपुराणादिवचनेभ्यः पित्रादीनां नान्दीमुखदेवतात्वमुक्तं ब्रह्मपुराणव
चने तु लेपभाजामुक्तत्वात् परस्परविरोधः परिहरणीयः परिहारश्च सर्वोक्तविषयभेदेन घटते नान्यथा
युक्तं चैतत् पित्रादीनां त्रयाणां मध्ये विद्यमानत्वाच्चतुर्थादयः प्रजावंतः चतुर्थादिनान्दीहितत्वे च पि
त्रादित्रयाणां तद्विषयकदुःखभावेन नान्दीहितत्वे मरणधर्मकत्वादश्रुमुखत्वमिति ततश्च विद्यमानपि
त्रादित्रयस्यापि इह तौ नान्दीमुखे श्राद्धमावश्यकमिति गम्यते न पार्वणादिश्राद्धं पितृपितामहे प्रपिताम
हे च जीवति न कुर्यादिति विष्णुना निषिद्धत्वात् एवं मात्रादिषु त्रिषु मातामहादिषु च विद्यमानेषु च ज्ञेयं २०९

अनेन न्यायेन तु सधर्माणामंशानां चैवाधवः स्यात् आस्थिसंचयात् शरीरस्य द्वादशाहः प्रशस्यते शूद्रविषये सपिंडी
करणं कर्तव्यमिति नन्वत्र विरुद्धः मंत्रवर्जेन शूद्राणां द्वादशेहनि कीर्तितमिति अमावस्याश्राद्धकारिशू
द्रविषयेण तद्दिनात्पराकैकन्यूनतैव वचनबलाच्छौचमध्य एव कर्तव्यम् अथाभ्युदयिकं श्राद्धम् तत्र
उक्तवानन्तरं तन्नानयत्तोद्वाहादिमंगले मातरः प्रथमं पूज्याः पितरस्तदनंतरम् ततो मातामहानां च विश्वे
देवास्तथैव च अत्र कालनियममाह गार्ग्यः मातृश्राद्धं च पूर्वेद्युः कर्माहनि च पैतृकं मातामहं चोत्तरे
द्युर्वृद्धौ श्राद्धत्रयं स्मृतम् दिनत्रयकरणासम्भवे वृद्धशातातपः पृथग्दिनेष्वशक्तश्चेदेकस्मिन्पूर्ववा
सरे श्राद्धत्रयं कुर्वीत वैश्वदेवं तु तांत्रिकं शातातपः पूर्वाह्णे दैविकं कार्यमपराह्णे तु पैतृकम् एको
द्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति प्रातरिति सति सम्भवे अन्यथा रात्रावदोषः तत्र जन्मनि जातक
र्मोक्तेः सीमन्तोन्नयनादीनां त्वपराह्णोपपत्तेः आश्वलायनगृह्यपरिशिष्टे आभ्युदयिके युग्मा ब्राह्मणा अमूला
दर्भाः प्राङ्मुखेभ्य उदङ्मुखो दद्यात् ऋजुदर्भेभ्यो वा पांसखो द्वौ दर्भौ पवित्रे इति कात्यायनः आभ्युदयिके प्रदक्षि
णमुपचारोपि अमंत्रवर्जं जपः ऋजवो दर्भाः [illegible] लार्थं संपन्नमिति तत्र प्रश्ने दधिबदराक्षतमिश्राणि

द॰ मा॰ वैर्णानामुदयं कुर्वन्नाप्नोति तत्फलम् एवं च [illegible]स्या द्वादशाहकाले दर्शात्मककालः आशौ[illegible]तमध्यवर्तिः वां १
२०८ अनेनैवाभिप्रायेण पराके एवं च साग्निकस्य [illegible]न्वयः सपिंडीकरणकालाद् ऊर्ध्वं भवति द्वादशाहस्याशौ
चांत[illegible]थमदर्शयोर्मध्ये किमप्यहस्याशौचानंतरं प्रथमो दर्श इति अनेनैवाभिप्रायेण कल्पतरा
वपि द्वादशाहो दशाहात्परकालीनाया अमावस्यायाः पूर्वं किमप्यहो दशाहात्परामावस्या चेति यदा
कर्त्ता ना[illegible]साग्निः प्रेतस्त्वाहिताग्निस्तदा सर्वं तदाह प्रेतश्चेदाहिताग्निः स्यात्कर्त्ता नाग्निर्यदा भवेत् स
पिण्डीकरणं तस्य कुर्यात्पक्षे तृतीयके यदा कर्त्ता प्रेतश्चाहिताग्नी तदापि त्रिपक्ष एव तस्य दाहादे
कादशाहादिकस्य कर्त्तव्यत्वात् साग्निकस्य पूर्वोक्तकाललोपकथमित्याकांक्षायां गोभिलः द्वादशाहा
दिकालेषु प्रमादादननुष्ठितं सपिण्डीकरणं कुर्यात्कालेषूत्तरभाविषु अनाहिताग्नेस्तु दशाहाद
यः समस्ता भवंति तथा च भविष्यत्पुराणे सपिण्डीकरणं कुर्याद्यजमानस्त्वनाग्निमान् अनाहिता
ग्नेः प्रेतस्य पूर्णेऽब्दे भरतर्षभ द्वादशोह्नि षष्ठे वा त्रिपक्षे वा त्रिमासि वा एकादशेऽपि वा मासि मंगलं स्यादु
पस्थितं षष्ठे वा मासीत्यन्वयः यदा वृद्ध्यादिमंगलमुपस्थितं स्यात्ततः पूर्वमपि कालः इत्यर्थः वाक्यं २०८

ण्डीकरणं कार्यं तदाह हारीतः यावत्पूर्वममावस्या मृताहाद्दशमा भवेत् सापिण्डीकरणं तस्मिन्नेव कुर्या
न्नवतोऽग्निमान् मृताहाद्यद्दशमहन्तस्मात्परायाममावस्यैव श्राद्धस्य चेत्यर्थः आहिताग्निना त्वाग्नियेन वैषण
नवाक्त्रीशौचानंतरदर्शे सापिण्डीकरणं कार्यं यथाह जाबालिः सपिण्डीकरणं सर्वान्त्यदर्शे दर्शेऽग्निमान्स्वतः
परतो दशरात्रस्य पूर्णोद्देनतन्नयापरः अस्यार्थः सापिण्डीकरणं कुर्यात्पूर्वदर्शे इत्यनेन दशमदिनादर्वा
ग्यदा कदाचिदपि आमस्य दर्शस्य सापिण्डीकरणकालत्वे प्राप्ते सकालउत्कृष्टो दशरात्रात्परतनइति पर्वत
च दशरात्रसन्निहितानंतरकाल आशौचानंतरकालेऽप्यविरुद्धमिति ज्ञातेऽशिन्यायेनाशौचानंतरकाले प्यविरु
द्धदर्शे कर्तव्यं तथा च दशरात्रशब्दोऽप्याशौचानंतरकालोपलक्षको ब्राह्मणादीनां सर्वेषामाहिताग्नी
नां द्वादशाहमाशौचांतप्रथमदर्शयोर्मध्येयः कालस्सोऽपि सपिण्डीकरणकालः तथा कात्यायनः एका
दशाहं निर्वर्त्य सर्वांदशाय यथाविधि सकुर्वीताग्निमान्विप्रो मातापित्रोस्सपिण्डनम् आशौचानंतरं
योदर्शस्तस्मिन्मध्येऽपकाल्मिन्दिने सपिण्डी[illegible]णं कुर्यादिति आहिताग्नेः पिण्डपितृयज्ञाधिकारि
णो दर्शेऽपि पिण्डपितृयज्ञार्थस्तु पदेशः अतएव [illegible] पतिः नासपिण्ड्याग्निमत्रः पितृयज्ञं समाचरेत् सपि

म॰ पा॰
२२४

ष्यत्रिरात्रंशूद्रएववा॥ हारीतः वहकमाणस्यलंघितमस्नानोमंचभोजनं अहोरात्रेणशुद्धिःस्यात् दिनंमध्येनचैवहीति उप
वासदिनजययोः स्तेमन्वय यमः अपंक्तौविषमंदद्यात्वयाचेतनदापयेत् प्राजापत्येनकृच्छ्रेणमुच्यतेकर्मणस्ततः
नदीसंक्रमहर्तुश्चकन्याविघ्नकरस्यच समेविषमकर्तुश्च निष्कृतिर्नोपपद्यते त्रयाणामपिचैतेषांप्राजापत्यंतुमार्ग
तो भेत्तलब्धेतुचान्तेमद्विजश्चान्द्रायणंचरेत् संक्रमउदकावतरणंवत्र्म समेविषमकर्तापुजादौद्विजस्यचान्द्रायणं
तन्त्रादीनांतुपादहन्याकल्पनीय ऋष्यशृङ्गः इन्द्रचापंपलाशाग्निंयद्यन्यस्यप्रदर्शयेत् प्रायश्चित्तमहोरात्रंधनुर्दण्ड
श्चदक्षिणा॥ क्रमेणधनुर्दण्डादक्षिणा गौतमः नम्रोह्याश्चधार्मिकैःसहसंभाषेतसंभाष्यपुण्यकृतोमनसाध्या
येत् ब्राह्मणैर्वासहसंभाषेत तल्पान्नधनलाभवधेषुपृथग्वर्षाणीति तल्पभार्या तल्पादीनांलाभस्यवधेविघ्न
करणेपृथक्एकैकसंवत्सरंप्राकृतब्रह्मचर्यमित्यर्थः हारीतः चाण्डालश्वपचौ नीच संकरेसमुपस्थिते अहोरात्रंत्रिरात्रंस्या
त्रिरात्रेषडहःषडहस्ततम् अविज्ञातस्तुचण्डालःसन्नाहंनिवसेद्यदि तस्माज्ज्ञात्वोपसन्नस्यकर्तुर्विप्रस्यनुग्रहम् स
पित्तीरजनैर्युक्तंकृच्छ्रंगोमूत्रयावकं प्राशयेत्सहसत्यैस्तुमासमेकंनिरंतरम् तथा यद्युत्तिष्ठन्यनाचांतोभक्ता
नकासनात्तत् सद्यःस्नानंप्रकुर्वीतसोन्यथाप्रयतोभवेत् वसिष्ठः दंष्ट्रोतगौगनेकाराजमुपवसेत्त्रिरात्रंतुपुरो २२४

देवब्राह्मणस्पर्शे प्रायश्चित्तविधिस्तथा दिवसोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत् एतच्च कामकृते अकामकृते प्र
सादनमात्रेणैव स्वसन्निहितानामप्सु उदके वा कामतो मूत्रपुरीषाद्युत्सर्गमनुः विमुञ्चेदप्सु वाप्यां तु शारीरं सन्निधौ य
तु सचैलो बहिः स्नात्वा गामालभ्य विशुध्यति आलभ्य स्पृष्ट्वा कामतस्त्वमोक्षे आपद्गतो विना तोयं शारीरं यो
निवर्तते एकाहं क्षपणं कृत्वा सचैलं स्नानमाचरेत् अनापदि सम्मतं कृते अप्स्वग्नौ वा मेहने तप्तकृच्छ्रमिति म
नुः वेदोदितानां नित्यानां कर्मणां समतिक्रमे स्नातकव्रतलोपे च प्रायश्चित्तमभोजनं यत्र श्रौतेषु स्मार्तेषु वा।
नित्यहोमादिषु लोपे सति प्रायश्चित्तविशेषो नाम्नातस्तत्रोपवासप्रायश्चित्तं आम्नातश्चेत्तेन सह भोजनं सम
वीयते स्नातकव्रताधिकारे कृतः एतेषामाचाराणामेकैकस्य व्यतिक्रमे गायत्र्यष्टशतं जप्यं कृत्वा पूतो भवती।
ति बृहस्पतिः अनिर्वर्त्य महायज्ञान्यो भुंक्ते प्रत्यहं गृही अनातुरः सति धने कृच्छ्रार्धेन विशुध्यति महायज्ञाः पं
च महायज्ञाः एतच्च विशेषानुपासनादापयकामकृते कामकृते द्विगुणं आयघकामतः कृच्छ्रपादः कामतः
कृच्छ्रार्धमेवेति कल्प्य एतच्च सकृत्करणे अभ्यासे तु कल्प्यं तथा स्नातो न गच्छेज्जायां वा सोपि कृच्छ्रार्धमाचरेत्
देवलः स्वभार्यां मैथुनं च क्रोधाद्यामेति निरोवदेत् प्राजापत्यं चरेद्विप्रः त्रिदिवसान्त्ये पक्षां चरेद्धि।

म॰ पा॰ २७

उपाकर्मादिके चोक्तमृषीणां चैव तर्पणं ऊर्ध्वं तु ब्राह्मणः श्राद्धं वेदानुद्दिश्य शक्तितः अप्राप्ते श्रावणस्यांत इति शुक्लप्रतिपदादि
मासाभिप्रायेण अप्राप्ते श्रावणस्यांत इति पाठः तदा कृष्णप्रतिपदादिमासाभिप्रायः दिनोदय इत्यौदयिकपर्वाभिप्राय एता
वैते तैत्तिरीयकाणामेव तथा च बह्वृचपरिशिष्टकारिका पर्वण्यौदयिके कुर्युः श्रावणे तैत्तिरीयकाः बह्वृचाः श्रवणे कुर्युर्ग्रह
संक्रांतिवर्जिते इति तैत्तिरीयव्यतिरिक्तैर्यजुःशाखीयैः पूर्वविद्धैव पौर्णमासी ग्राह्या श्रावणी दुर्गनवमी दूर्वा चैव हुताशा
नी पूर्वविद्धानुकर्तव्या शिवरात्रिर्बलेर्दिनमिति स्मरणात् न चैतदनुपपन्नं औदयिके पर्वणि तैत्तिरीयका एव कुर्युरिति व
क्तुमशक्यत्वात् तथा हि औदयिकत्वविशेषणविशिष्टपर्वणि यदुपाकर्म तदनुवादेन हि तैत्तिरीयकाः कर्तारो विधीयंते त
था च वाक्यभेदप्रसंगः किं चौदयिकत्वस्याप्राप्तत्वादनुवादोपि न घटते नापि तैत्तिरीयककर्तृकत्वविधिः अन्हिकर्मणि तद्
विधानेऽपि तु कर्तृहि कर्म विधीयते किं च बह्वृचगृह्य एवोपाकर्मणस्तत्कालस्य पौर्णमास्याश्च विधानादत्र कारिकाया भा
गस्य पौर्णमासीकालत्वसौदयिकत्वसंबंधो विधेयः तथा गह्वयकर्तृणां तैत्तिरीयकाणामौदयिकत्वेनापरः संबंधो विधेयः संबं
धद्वयस्याप्यप्राप्तत्वात् तथा च द्व्यधिकारो वाक्यभेदः प्राप्ते कर्मण्यनेकगुणविधानात् न चारुणैकहायनीन्यायेन पार्लिकान्व
यः कर्मणः प्राप्तत्वाद्द्रव्यगुणरूपत्वाभावाच्च तत्र ह्यारुणगुणो द्रव्यरूपगोद्वारा सोमक्रयण उपयुज्यते अत्र तु तैत्तिरीयरूप। २७

त्विनां भवति बह्वृचानां सामगानां वाषाढमासश्रवणहस्तनक्षत्रयोर्भवतिकासिंश्चिदयिजरकस्याखाविशेषे सामशाखावावि
शेषेवाषाढमासेविष्यदर्शनात् शिष्टपरंपरायामकृतत्वाच्च कालदृष्टावप्युपाकर्मोत्कर्षोभवति यदाहकात्यायनः उ
त्कर्षः कालदृष्टौस्यादुपाकर्मादिकर्मणि अभिषेकादिदृष्टीनांनउत्कर्षोयुगादिषु यत्तुऋष्यशृंगावचनेदशाहरास्तुनोत्
कर्षस्त्वतुर्षुयुगादिषु उपाकर्मणिचेतिछंदोगविषयं यतःकालदृष्टावपितेषांसिंहार्कएवोपाकर्म तथाचगार्ग्यः सिं
हेरवौपुष्यऋक्षेपूर्वाह्णोविचवेदविहि: छंदोगामिलिताःकुर्युरुत्सर्गंस्वस्वछंदसां श्रुतपदेतउहेलेनउपाकर्मायदाह्निक
मिति सिंहेरवावुपाकर्मपुष्यत्वोत्सर्जनमित्यर्थः अत्रकर्तव्यतामाहकार्ष्णाजिनिः उपाकर्मापराह्णिकमिति सिंहेर
वावुपाकर्मपुष्यत्वोत्सर्जनमित्यर्थः अत्रकर्तव्यतामाहकार्ष्णाजिनिः उपाकर्मणिचोत्सर्गेयथाकालंसमेत्यच ऋषी।
न्दर्भमयांकृत्वापूजयेत्तर्पयेत्ततः दृष्टतत्त्ववेत्ताः भवेदुपाकृतिः पौर्णमास्यांपूर्वाह्णएवतत्राह्मणानभोजयेन्नत्रयित्वतुदे।
वपदेवता बौधायनः गौतमादीनृषीत्सप्तकृत्वादर्भमयान्पुनः पूजयित्वायथाशक्तिपूजयेद्दवमुख्यदेवत् गौतमादीनिति
स्वस्वशाखोक्तऋषिप्रदर्शनार्थः ऋचमितिऋग्वेदंपूजयेत् उद्देवसेठता एतन्नवेदांतराणामपिप्रदर्शनार्थं भविष्योत्तरे
अप्राप्तेश्रावणस्यांतेपौर्णमास्योदितोदये स्नानेऊवीतमतिमांश्रुतिस्मृतिविधानतः ततोदेवान्पितृंश्चैवतर्पयेत्सदमोभसा

स्कांसवितृदेवताकस्य प्रथमो वनेउत्तमे समरोतो विनियुक्तो विश्वारूपाणिप्रतिमुंचते इमेतामेवं ब्रूयात् सर्वेषां वा ब्राह्मण
त्रविशां गायत्रीमेव ब्रूयात् गायत्रीछन्दस्कामुक्तलक्षणां सावित्रीमाहयाज्ञात प० तत्सवितुर्वरेण्यमिति सावित्रीं ब्राह्मण
स्यतां सवितृदेवितिराजन्यस्य विश्वानिरूपाणीति वैश्यस्येति कात्यायनोपि सावित्र्या ब्राह्मणमुपनयेत् त्रिष्टुभा राजन्यं जगत्या
वैश्यं सर्वेषां वा सावित्रीति आह च लौगाक्षिः भूर्भुवः स्वरित्युक्त्वा तत्सवितुरिति सावित्रीं त्रिरुक्त्वाह पच्छोर्धर्चशस्सर्वामंत
इति अथ समिधादानमुपनयनांगभूतं कर्तव्यमिति स्वस्वगृह्योक्तविधिना तथैव प्रतिदिनमपि अग्नि[illegible]र्यवज्जीवनमेधनो
तदनंतरमिति संवर्तस्मरणात् तदनंतरं संध्योपासनानंतरम् एतच्च कालद्वयेपि कार्यं तदाह याज्ञवल्क्यः अग्निकार्यं
ततः कुर्यात्संध्ययोरुभयोरपीति केचित्तु सायमेवेच्छंति तथा च लौगाक्षिः सायमेवाग्निमिंधेनमेक इति मनुस्तु दूरादा
हृत्य समिधः संनिदध्याद्विहायसि सायंप्रातश्च जुहुयात्ताभिरग्निमतंद्रितः दूरादन्यापरिगृहीतदेशादित्यर्थः विहाय
सि मण्डपादौ अन्यपरिग्रहनिषेधमाहापस्तम्बः यथा कथं च परपरिग्रहमभिमन्यते स्तेनो भवतीति अत्र विशेषः स्मृत्यं
तरे पुष्पालमयास्त्वाग्रुदीचीं गत्वा समिध आहरेदिति पुष्पालमयादिसत्त्वेस्तमिते निषेधः अत एवापस्तम्बः नास्तमितेनि रु

सं· पा· ८ षेयः नास्तिमितेसमिद्धानाथगछेत् वायुपुराणेपालासः समिधःकार्याः खादिर्यस्तदालाभतः समीरोहितकाश्वत्थात
दभावेर्कवेतसादिस्तिकात्सायनः नांगुष्टादधिकार्यासमित्स्थूलतयाक्वचित् नसकीटाःत्वचाचैवनविशुक्तानपाटिता
प्रादेशान्नाधिकानोनातथानैवद्विशाखिका अथाभिवादनम् तत्र याज्ञवल्क्यः ततोभिवादयेद्वृद्धानसावहमितिब्रुवन्
ततोग्निकार्यादनंतरम् ब्रह्मपुराणे उत्थायमातापितरौपूर्वमेवाभिवादयेत् आचार्यश्चततोनित्यमभिवाद्योविजानता
मनु लौकिकंवैदिकंवापितथाध्यात्मिकमेववा आददीततयोज्ञानंतंपूर्वमभिवादयेत् अभिवादात्परंविप्रोज्यायांसमभि
वादयेत् अभिवादात्परंविप्रोज्यायांसमभिवादयेत् अदोनामाहमस्मीतिस्वनामपरिकीर्तयेत् आश्वलादयइसेतस्माकह
ह्यामंवंअमुकनामाहमस्मीतिस्वनामपरिकीर्तयेत् उवःसमेराजन्योमध्यसमंवैश्यणानीचैःशूद्रःप्रांजलिःसर्वत्र मनुः भोः
शब्दंकीर्तयेदंतेस्वस्यनाम्नोभिवादने नाम्नांस्वरूपभावोहिभोःशब्दऋषिभिःस्मृतः आयुष्मान्भवसौम्येतिवाच्योविप्रो
भिवादने अकारश्चास्यनाम्नोंतेवाच्यःपूर्वाक्षरःप्लुतः ॥ भोःशब्देनहिबोधितोमा स्यनामवुध्यतइतत्रभूयात्ः पर्यर्थः
भोभावइतिपाठेभोः शब्दःसाभावस्मृता आयुष्मान्भवसौम्येतिवाक्यस्यांतेअस्याभि दस्यनामवाच्यंविलुप्तमन्त्रितिस्स
भोःशब्दोनाम्नांहकीयानांस्वरूपभावः स्वरूपस्यबोधंप्रतिप्राप्तिहेतुः ग्रंथमर्थः २

चोतेअकारो [illegible] वाकारस्य पूर्वान्तरः प्लुतः पूर्वान्तरं प्लुतं छांदसो लिंगव्यत्ययः यद्यपि पूर्वान्तरं नकारस्तथापि तस्य
व्यंजनत्वेन प्लुतत्वायोगात् शर्मन्निसत्रयो यमकारः स एव पूर्वपदाभिधेय इति तस्मै प्लुतता पूर्वान्तरः प्लुत इति पाठे पूर्वान्तरे
प्लुतमस्येति बहुव्रीहिः अथवा अकारस्य आस्य नाम्नोंत इत्यस्यायमर्थः अस्याभिवादकस्य नाम्नोंते योयमकारः अकार इति।
स्वरमात्रोपलक्षणं सर्वेषां नाम्नामकारांतत्वनियमाभावात् स एवांत्यस्वरः पूर्वान्तरः पूर्वाणि नामगतान्यक्षराणि यस्य स
तथोक्तः एवंविधः प्लुतो वाच्यो न पुनरन्य एवाकारो नाम्नां ते वाच्य इति तथा च वसिष्ठः आमंत्रिते स्वरो [illegible] आस प्लुत इति आ
मंत्रिते कर्त्तव्ये अभिवादकनाम्नोंते यः स्वरः स प्लुवते त्रिमात्रो भवतीत्यर्थः तत्राभिवादनप्रत्यभिवादनयोरेवं प्रयोगविशेषो
न। गो भवति अभिवादये चैत्रनामाहमस्मि भो इति आयुष्मान्भव सौम्य विष्णुशर्म ३ अन् अ इति अथवा आयुष्मान्भव सौ
म्य विष्णुशर्मान् इति तत्र वैश्ययोस्तु वर्मगुप्तशब्दप्रयोगः यत्तु स्वनामगोत्रं भवति आत्मनामगुरोर्नाम [illegible] यत्नामक्षपणा।
स्य च आयुष्कामो न गृह्णीयाज्ज्येष्ठपुत्रकलत्रयो पित्रादिविधिनिषेधतयोरभिवादनव्यतिरिक्तस्थानविषय इति ज्ञेयं यत
आभिवादने हस्तद्वयेन कार्यम् अन्यथाकरणे विस्मनादोषोक्तेः जन्मप्रभृति यत्किंचित्तस्माद्धर्ममाचरेत् सर्वं तन्निष्फलं।

सं॰ पा॰ ८

यातिएकहस्ताभिवादनात् एतदपिविद्वद्विषयं यतः सएवाह अज्ञाकर्णेनविदुषोमूर्खाणामेकपाणिनेति अज्ञाकर्णेनश्रो
त्रसमीकरोहत्वाप्रसंसंपुटितेनकरद्वयेनेत्यर्थः अजःकर्णौसंपुटितौयथातथैवसंपुटितेकरद्वयमपीत्यज्ञाकर्णोक्तिः प्रत्यभि
वादनेपिदीक्षितस्यनामनग्राह्यं तथाचमनुः अवाच्योदीक्षितोनाम्नायवीयानपियोभवेत् भोभवत्पूर्वकंत्वेनमभिभाषेतधर्म
वित् भोदीक्षितभवदीक्षितेति भोभवत्पूर्वकंयौगिकैः शब्दैरेनंप्रत्यभिवादनादिष्वभिभाषेतेत्यर्थः योनवेत्त्यभिवादस्यविप्रः
प्रत्यभिवादनं नाभिवाद्यःसविदुषायथाशूद्रस्तथैवसः यमः अभिवादितयोविप्रआशिषंनप्रयच्छति श्मशानेजायतेवृक्षः
काकगृध्रादिसेवितः शातातपः पाषण्डंपतितंव्रात्यंमहापातकिनंशठम् सोपानत्कंकृतघ्नंचनाभिवादेत्कदाचन अभ्यं
तंचप्रमत्तंचसमूत्रोच्चारकृतंतथा भुंजानमाचमानार्हंनास्तिकंनाभिवादयेत् वमंतंजृंभमाणंचकुर्वंतंदंतधावनं अभ्यक्त
शिरसंचैवस्नांतंनैवाभिवादयेत् उदक्यांसूतिकांनारींभर्तृघ्नींब्रह्मघातिनीम् अभिवाद्यद्विजोमोहात्सहोरात्रेणशुध्यति
जमदग्निः देवताप्रतिमांदृष्ट्वायतिंदृष्ट्वात्रिदंडिनम् नमस्कारंनकुर्याच्चेत्प्रायश्चित्तीभवेन्नरः मनुः अभिवादनशीलस्यनि
त्यंवृद्धोपसेविनः चत्वारितस्यवर्धंतेआयुःप्रज्ञायशोबलम् एतच्चाभिवादनमपि[illegible]णामेवकार्यम् तथाचमनुः [illegible]स

गा॥ एवे देवा वरप्रदाः ये यत्र विहिताः श्राद्धे सावधानमथ बंधने इष्टिश्राद्धमन्वाधानादौ क्रियमाणं नान्दीमु
खे ह्यदि श्राद्धे नैमित्तिके सपिण्डीकरणे काम्ये याम्येय गयामहालयादिश्राद्धे काम्ये पार्वणं दर्शश्राद्धं स
कलश्राद्धं मन्वन्तरीभूतं यदा महालयश्राद्धं नित्यवृद्ध्याकरोति तदा पुरूरवोमाद्रवावेव यदा केवलकाम्यवृ।
द्ध्यानतदा धुरिलोचनावेव यदा भयवृद्ध्यानतदापि धुरिलोचनावेव यतः काम्यं नित्यस्य बाधकं यदा नगोऽसो
... शुकामं इति वक्तृणा फलाधिकारः स्यान्न दोपक्रमे कामनाभावान्नित्यकर्माश्रयेणेन्द्रुगुणफलवि
धेयश्रुतरवार्द्रवावेति विवेकः अनेनैवाभिप्रायेणादित्यपुराणे विश्वेदेवौ क्रतुदक्षः सर्वास्विष्टिषु की
र्त्तितौ पुरूरवोमाद्रवौ नित्ये नान्दीमुखे श्राद्धे वसुसत्यौ च येन केन वान्नलम्भने देवे कालकामौ सदैव हि
प्रपितृकन्यागते सूर्ये श्राद्धे च धुरिलोचनौ पुरूरवोमाद्रवौ चैव विश्वेदेवौ च पार्वणे येन केन वान्नलम्भने न
...नान्नलम्भनरूपनिमित्तेन पितृभक्तान्नवान्नेन श्राद्धे क्रियमाणे अथवा नवान्नलम्भने सपिण्डीकरणे
...पितृभिः सार्धं तत्रैवान्नस्य प्रथमतएव लाभो नवान्नलम्भनं आवाहनानंतरं याज्ञवल्क्यः यवैरन्ववकि
रीयभाजने सपवित्रके शन्नो देव्या पयः क्षिप्त्वा यवोसीति यवांस्तथा विश्वेदेवस्यानेन अर्घपात्रेमेकं...

म॰पा स्थापितस्थाने पक्वं त्रीणि वा षड्दद्यात् वै पञ्चाङ्गर्वेति अर्घ्यपात्राणि तु कात्यायनः सौवर्णराजततोडुम्बरखड्गम
१८८ णिमयानां पात्रमन्यतमेषु यानि वा वियंते पत्रपुटिकादिषु वा ते अनिषिद्धे इति शेषः राजतं दैवे निषिद्ध
त्तं मत्स्यपुराणे शिवनेत्रोद्भवं यस्मात्तस्मात्पितृवल्लभं अमंगलं तद्दानेन देवकार्येषु वर्जितं चकारोदि
शाति मते हे हे शलाके देवानां पात्रे कृत्वा यवानपि वेत् शन्नोदेव्याय यवोसीति यवनापि ततः क्षिपेत् पु
ष्पधूपादिभिः पूजां कृत्वा पात्रेषु मानवः पितृपात्रे विशेषोयं तिलोसीति तिलान् क्षिपेत् तिस्रस्तिस्रः श
लाका स्थापित पात्रेषु पार्वणे एकोद्दिष्टे शलाकैकां निधायोदकमाहरेत् शलाकाः साग्राः कुशाः योग
याज्ञवल्क्यः पवित्रेस्थ इति मंत्रेण द्वे पवित्रे च कारयेत् अनंतर्गर्भिते नाग्रच्छिन्ने प्रादेशसंमिते प
वित्रे स्थो वैष्णवी वायुर्वो मनसा ... इति मंत्रः यज्ञपार्श्वः ओषधीमंतरेण कृत्वाग्रं अंगुलिपर्वणोः छि
न्द्यात् ... पवित्रं छित्वा ... एवमर्घ्यपात्रस्थापनानंतरं याज्ञवल्क्यः या दिव्या इति मंत्रेण
हस्ते अर्घ्यं विनिक्षिपेत् मत्स्यपुराणे मंत्राहुतिः एवमुक्त प्रत्येकेपि अत्र विशेषमाह गार्ग्यः दत्वा ह
स्ते पवित्रं तत्कृत्वा पूजां च पादतः या दिव्या इति मंत्रेण हस्ते अर्घ्यं विनिक्षिपेत् ब्रह्मपुराणे ततो वामेन १८८

हस्तेन गृहीत्वा च मसाञ्जमान् पितृतीर्थेन दक्षिणेन च पाणिना विश्वेदेवस्थाने देवतीर्थेन दद्या
त् पितृस्थाने पितृस्थानेन दद्यादिति विवेकः ततः […] गृहीत्वा विश्वेभ्यो देवेभ्यः स्थान
मसीति […] तथा च याज्ञवल्क्यः दत्वा […] विधानतः पितृभ्यः
स्थानमसीति […] पितृस्थाने […] विधानाद्देवस्थाने […] मभिप्रेतम् […]
[…] दकानि प्रचेताः पादप्रभृति मूर्धान्तं देवानां पुष्पपूजनं शिवः प्रभृति पादान्तं
मेव इति पैतृके पुष्पग्रहणं […] प्रदर्शनार्थं याज्ञवल्क्यः दत्वोदकं गन्धमाल्यं धूपदानं
सदीपकम् […] ब्रह्मपुराणे […] चन्दनकर्पूरकुङ्कुमानि शुभानि च
विलेपनार्थं दद्यात् […] चन्दनं हरिचन्दनं व्यासः सपवित्रकरो गन्धैर्गन्धद्वा
[…] सृजयेत् […] गन्धदानं पवित्रसहितं […] विलेप
[…] पवित्रं […] समालभते द्विजे राक्षसानां भवेत् श्राद्धं […]
[…] पितरो गताः समालभनमनुलेपनम् […] वर्जयेत् गन्धा

दिग्ज्ञानसिद्ध्यर्थं दैवे पित्र्ये च कर्मणि ललाटे पुंड्रं कं दृष्ट्वा स्कंधे माल्यं तथैव च निराशाः पितरो यांति दृष्ट्वा च वृ
षलीपतिः पुंड्रं वर्तुलमिति अपरार्के हेमाद्रि स्मृत्यंतरः माल्यं शिरसा यां संधार्यमित्याह वृद्धमनुः पुष्पितु
ष्कैः शिखावर्जं माल्यं शिरसि वेष्टयेत् विष्णुः स्नात उपविष्टः प्रयतः सुमनसः प्रशस्तास्तथा पद्मोत्पला
नि च गंधधूपोपपन्नानि यानि चान्यानि हृद्यानि त्वष्टाः पितरो जपादि कुसुमे केतकी रूपिका सकुरंटिका पुष्पा — णि वर्जनीयानि श्रा द्धकर्मणि नित्यशः ४
आदिशब्दाज्जलजानि तिक्तकटूनि पुष्पाणि गृह्यंते दृप्तिकार्कपुष्पं पीतकुरुंटिकादीनि उग्रगंधीन्यगंधी
नि निद्रष्टानि च विवर्जयेत् चन्दनागुरुणी चोभे तथैवोशीरपद्मकं तुरुष्कं गुग्गुलं चैव धृता[illegible]ग
न्धहेतू धूपेन केवलं दद्यात्पुरुषं वा न्यायगुग्गुलं तुरुष्कः सिल्हकः गणगुग्गुलुः सर्जरसः विष्णुः
धूपं न दीपो दातव्यस्तिलतैलेन वा पुनः शौनकः एतस्मिन्काले गंधमाल्यधूपदीपाच्छादनानां प्र
दानं [illegible]न्काले स्वर्ग[illegible]नानंतरं मन्त्रैः प्रवंवस्त्राणीत्यनेन दद्याद्वासांसि शाङ्खितः शातातपः
प्रवालसुवर्णरजतवस्त्रं दद्यात् तदभावे यज्ञोपवीतकं [illegible]पुराणे लोके श्रेष्ठतमं सर्वमात्मनश्चापि
यत्प्रियं सर्वं पितॄणां दातव्यं तद्देवानामक्षय्यता वैश्वदेवानामर्घविधानानंतरं याज्ञवल्क्यः अथ १८९

द्वयं ततः कृत्वापिण्डग्राममप्रदक्षिणं द्विगुणांस्तु ग्रान्दत्वा उपांतस्वेन चापि तद्वत् आवाहनदत्त
स्नातो जपेदायं तु नस्ततः यवार्थ्यास्तु तिलैः कार्याः दंयोदि पूर्ववत् दत्वार्घं संस्रवांस्तेषां पात्रे
कृत्वा वि..ततः पितृभ्यः स्थानमित्युक्त्वा कुर्यात्सूमाधोमुखम् कात्यायनः एकस्मिन्पात्रे संस्रवा
न्समवनीय पुत्रकामो मुखमन्यक्ति तथा कुशवन्तां मूलावधोमुखं कुर्यात्तस्योपरि कुशानिति आसन
...तिवस्त्रदानपर्यंतं पूर्वोक्तरीत्या कृत्वा भोजनं तु भाजनस्थापनार्थं मण्डलानि कार्याणि तथा च ब्रह्मपुरा
णे मण्डलानि च कार्याणि नीवारैः चूर्णकैः शुभैः गोमयेन मृदा वापि मणीतेनापि भस्मना गोवम्ह
त्रिकया वापीति तृतीयपादे पाठांतरं पाषाणचूर्णसंकीर्णमाहतं तत्र वर्जयेत् मणीतेन मण्डलार्थं
मानीतेन अथाग्नौकरणादि निर्णयः तत्र मार्कण्डेयपुराणे आहृत्याग्निस्तु जुहुयाद्दक्षिणाग्नौ समा
हितः एतच्च सर्वाधानपक्षे अर्धाधानपक्षे तु औपासनाग्नैरेव स्मार्तं कर्मविवाहाग्नौ कुर्वीत प्रत्यहं गृह
हि दायकालाहृते वापि श्रौतं वैतानिकाग्निषु विति स्मार्तं कर्म गृह्याग्नावेव नियमात् वाजसनेयी
आहृत्य दक्षिणाग्निं तु होमार्थं वै प्रयत्नतः अग्न्यर्थं लौकिकं चापि जुहुयात्कर्मसिद्धये अग्न्यर्थमग्नौ

म॰ पा॰
१६०

करणहोमार्थं लौकिकस्यावसथ्यो गृह्याग्निर्विजिज्ञास्यते। स्मृतिचोदिकाराविभिः श्रौतस्मार्तव्यतिरिक्तोऽभिहि-
तः तदापि विधानेऽविहितं अन्वाहितानग्निस्त्रौपसदे अग्न्यभावेनाप्सु चेति मार्कण्डेयेनोपसदे गृह्याग्नेराधि-
त्र्यप्सु होमाभिधानात् लौकिकाग्निस्वीकारोऽनुचितं मन्वादि अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् इति
पाणौ होमो विधीयते श्रौतगृह्याग्न्यभावश्चानुत्पन्नप्रागभावः प्रध्वंसाभावोऽत्यन्ताभावश्चेति गृहाश्रमस्वीकरणा
त्पूर्वं प्रागभावः आश्रमस्वीकरणानन्तरमग्नेः प्रमादादिनोत्पादे आश्रमभ्रंशो वा प्रध्वंसाभावः न च पुनः सं-
धाने पुनराश्रमस्वीकारे तत्र गृह्याग्न्युत्पत्तिः नैष्ठिकस्याविवाहाभावादत्यन्ताभावः श्रौतस्मार्ताग्न्योः प्रागभावे
[illegible]ध्वंसाभावे वाप्याहवनीयमन्वाग्निसंपादनस्याशक्यत्वात् पाणिपादिषु होमः ये लौकिकाग्नेरपि होमाधि-
करणत्वमङ्गीक्रियते तेषां तु लौकिकाग्नेः सुसंपादत्वात् अग्न्यभाव एव नास्तीति तदभावे यदा पाणि स्वीक-
रणप[illegible]नक्ता एवं[illegible] अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति मन्वादिवचनानि निरर्थकानि
स्युः तस्माल्लौकिकाग्निरावसथ्याग्निर्गृह्याग्निरिति [illegible] अथवा श्रौतस्मार्तव्यतिरिक्त एवात्र लौकिका-
ग्निः स च विप्रादीनां ग्रामग्रीकरणहोमार्थं विधीयते यस्तेनैव निरीयादिप्रारब्धस्वयन्मेमाना प्रत्नलोभ इत्या १९०

त्यादिभिर्मंत्रैरियमापानन्न याज्यभागपूर्वमग्नौकरणामाम्नातं तत्रेध्मादानादेः पाणावनुपयुक्तत्वादप्राप्तिः प्राप्तः
सत्व श्रौतो न च स्मार्तो विधुराणामित्यग्न्याकांक्षायां लौकिकोग्निरुपतिष्ठतइति तदुद्देशेन लौकिकाग्निवि
धानं पूर्वपक्षे अथ सम्बन्धार्थः आहिताग्नेः सर्वाधाने दक्षिणाग्नावग्नौकरणंहोमः अर्धाधाने औपासन
एवमनाहिताग्नेः स्मार्ताग्नौविद्यमाने तत्रैव अभावे पाणौवाप्सुवा अग्नौकरणमित्याश्वलायनः तत्पय का४
उदकसमीपेस्यात श्राद्धं सेयोविधिस्तदेति उदकसमीपेश्राद्धकरणेप्स्वेव ऽनवपाणौ आभ्युदयिकश्राद्धेपि
पिंडपितृयज्ञातिदेशाभावाच्छिष्टाचारविरोधाच्चाग्निसच्वावेपिपाणावेवेति विवेकः यच्चोक्तं धूर्तस्वामि
नापिपिंडपितृयज्ञोदक्षिणाग्नौविहितः आपस्तम्बेनापि तत्रापि पिंडपितृयज्ञातिदेशमंतरेणैवाग्नौकरणोप
देशात्तद्धोमेदक्षिणाग्निर्नप्राप्तः उपदेशात्तद्धोमे दक्षिणाग्निर्नप्राप्तः उपदेशातिदेशयोरभावात् तस्मात्स्म
र्ताधानपक्षे आपस्तम्बशाखिनामग्निकरणाभाव एवेत्येतदपि चिंत्यं उक्तरूपेणतत्प्रयुक्तत्वाज्जोहुत्वाग्नौपितृय
ज्ञहोमेतिकर्तव्यतादेशात्सर्वशाखास्वचकर्मोपकल्पेनाविरहोगोपसंहारस्यान्याय्यत्वादापस्तम्बशाखी
यानामप्यतिदेशः सिद्धः इति दक्षिणाग्नेरतिदेशात् प्राप्तत्वादग्नौकरणं सर्वाधानेपि विद्यत एवेत्यलमति

म.पा.

१२१

प्रपंचेन एवंश्चमयंविध्यग्न्यभावेपाणौहोमः यदुक्तंनामकर्मणीत्युक्तं अग्न्यभावेन्तुविप्रस्यपाणौदद्यात्तुदक्षिणे
अग्न्यभावः स्नातकस्तावद्यावद्भार्यांनविन्दतीति भार्यावेदनाभावोग्न्यभावः इतितदयमप्येकोइतिमत्पक्षीना
र्थं नत्वयमेवभावः इतिनियमार्थं पूर्वोक्तनीत्यासकारांतरेणाप्यभावोपपत्तेः किंचलब्धभार्यस्यापिदाय
विभागात्प्रागग्न्याहरणाभावपक्षे अग्न्यभावः यथा यावद्भार्यांनविन्दतीतिननियमार्थः यदपिगृह्यपरि
शिष्टे अग्निमन्माभावेपिकांचनपाणावेवहोमोविहितः अन्वष्टकंचमध्यावर्षंमासिमासस्यपार्वणं काम्य
मभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमे चतुर्ष्वाद्येषुसाग्नीनांवह्नौहोमोविधीयते पितृब्राह्मणहस्तेस्याद्वेके
षुचतुर्ष्वपीति अस्यार्थः अष्टकाश्राद्धेषुनवमीश्राद्धमान्वष्टक्यंसप्तम्यांक्रियमाणंमध्यावर्षंमासिमा
सिदर्शश्राद्धंपंचमीमभ्युदयेक्रियमाणंपार्वणसमाश्राद्धंकाम्यंतिथिनक्षत्रविशेषेषुविहितंफलकाम
नयाक्रियमाणम् अभ्युदयेपुत्रोत्पत्त्यादिनिमित्तेषुविहितं अष्टम्यांयद्विहितमष्टकाश्राद्धं एकोद्दिष्ट
सपिंडीकरणंअत्रअस्वर्ग्यंलोकविद्विष्टंधर्म्यमप्याचरेन्नत्वितिन्यायेनानाभ्युदयिकेसपिंडीकरणेवा
हिताग्नौहोमस्यानभिप्रेतत्वात्पाणावेव काम्ये अष्टम्यांचयेषांगृह्यपरिशिष्टेनेषामेवपाणौहोमः १२१

इतिरेषां मन्वादिवचनान्नु सावेणाभ्युदयिकसपिंडीकरणाख्यातिरिक्तश्राद्धेष्वग्न्यभाव एव पाणौ होम इति नि
र्णयः यदा पाणौ होमस्तदापि ब्राह्मणावह्नेपि मोक्षब्राह्मणहस्त एवं तेनान्यत्र तथा च कात्यायनः
पित्र्ये यः पंक्तिमूर्धन्यस्तस्य पाणावनग्निकः हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत् हुतशेषमित्यर्थः
पित्र्यब्राह्मणहस्त एवेति नियमः अत एव यमः देवविप्रकरेनाग्निः हुत्वाग्नौकरणं द्विजः इति अत्रापि
शेषं देवपात्रे विनिक्षिपेत् तथा च वायुपुराणे हुत्वा देवकरेणाग्निं शेषं पित्र्ये निवेदयेत् नाग्निस्तत्र
प्रणीयते भाजनो विश्वेदेवाः पुराणमौ अतः पित्र्यदेवकरयोर्विकल्पः तथा वैष्णवे देवयद्येकस्मिन्नेव तु श्राद्
यो द्विजाः तदेकपाणौ होतव्यं स्याद्विधिर्विहितस्तथा एकस्मिन्श्राद्धे विश्वेदेवस्थाने द्वौ चत्वारस्त्वेवं मा
तामहेत्यर्थः यदा मातामहश्राद्धं तत्रैव पांक्ति तदप्युग्रेव तदा मातामहश्राद्धपंक्तिमूर्धन्यपाणावपि
दृष्टव्यो होमः तथा च कात्यायनः मातामहस्यापि देवपितृयोर्नतत्रैव साग्निक इति मातामहस्थाने
देवस्य देवको पित्र्यब्राह्मणानां भेदपक्षे पितृवैवतत्रयुक्तपाणौ होमः तत्रैव मातामहश्राद्धं तत्सकृत् ५२
ब्राह्मणहस्ते एवाग्न्यभावस्त्वर्थः युक्तं चैतत् अग्निस्थानीयत्वात्पाणोः पृथक्त्वात् होमो होमश्च होमादि

म॰पा॰ करणं स्थमीति हविरुद्धरणमपि स्थगेव पाणाङ्कनं च न स्थानौ होतव्यं यदा रहसकारः अन्नं पाणितले दत्त्वा
१२१ पूर्वमश्नन्त्विद्वयः पितरस्ते न तत्त्वं तितो षान्नं न लभंतीति यच्च पाणितले दत्तं यच्चान्यदुपकल्पितं एकीकृत्यै
व भोक्तव्यं स्थग भावेन विद्यते अथाग्नौकरणविधिः तत्राश्वलायनः उद्धृत्य घृताक्तमन्नमनुभोजयामि अग्नौ
करिष्ये करवै करवाणीति प्रत्यनुज्ञातः क्रियतां कुरुष्व कुर्विति अथाग्नौ जुहोति यथोक्तं पुरस्तादभ्यनुज्ञातः
पाणिष्वेव वा अग्निमुखा वै देवाः पाणिमुखाः पितर इति ह ब्राह्मणं यदि पाणिष्वाचांतेष्वन्यदन्नमन्नादिशती
ति करिष्ये इत्यादि प्रश्नत्रये क्रियतामित्याद्युत्तरं यथासंख्यं प्रयोगानियम इति कल्पतरौ अयं नियमः सर्वेषामनु
तरः स्यादिनामेव न तावद्यदा कल्पतरावेव याज्ञवल्क्य व्याख्यान समये अग्नौ करिष्ये इति पृष्ट्वेति हूतमुद्धृत
मन्नमादयेत्तन्वयइत्यभिहितम् अग्नौकरिष्य आदाय पृष्ठत्यन्नं घृतप्लुतं कुरुष्वेत्यभ्यनुज्ञातः इति करिष्य
इत्यस्य कुरुष्वेति प्रत्युत्तराभिधानात् क्रिया नुपपत्तेः द्वितीये तु न विरोधः यथोक्तं पुरस्तादिति प्राचीना
वीती अपहतंधायेत्यादिना यदि पाणिष्वेवेत्यादिपाणौ होमपक्षे होमानंतरमाचांतेषु अन्यदन्नं ददातीत्य
र्थः एतदाचमनं पिण्डदानानंतराचमनवन्नैमित्तिकम् आचांतेष्विति वचनात् तिरस्थानमातामहस्या १२१